शीलव्रत-सनाथेभ्यः, साधुभ्यश्च नमो नमः ।
भव-लक्ष-सन्निबद्धं, पापं निर्णाशयन्ति ये ॥ ६ ॥

जेओ लाखो भवोनां अदर बांधेला पापनो समूल नाश करनारा छे अने शील तथा व्रतथी युक्त छे, एवा 'साधुओ' ने वारंवार नमस्कार हो ॥ ६ ॥

परिचय

5

श्रीहेमचन्द्राचार्ये महाराजा कुमारपाळनी विनतिथी 'त्रिषष्टिशलाकापुरुषचरित' नामनो बृहत्काय ग्रंथ संस्कृत भाषामां पद्यमां रच्यो छे । तेमां पंचपरमेष्ठी विशे छ श्लोको स्तोत्ररूपे आपेला छे तेने अहीं अनुवाद साथे प्रकट कर्यो छे ।

[५४-१]

कलिकालसर्वज्ञ-श्रीमद्-हेमचन्द्राचार्यरचित-श्रीवीतरागस्तोत्रमङ्गलाचरणम्

यः परात्मा परंज्योतिः, परमः परमेष्ठिनाम् ।
5 आदित्यवर्णं तमसः परस्तादामनन्ति यम् ॥ १ ॥
सर्वे येनोदमूल्यन्त, समूलाः क्लेशपादपाः ।
मूर्ध्ना यस्मै नमस्यन्ति, सुरासुरनरेश्वराः ॥ २ ॥
प्रावर्त्तन्त यतो विद्याः, पुरुषार्थप्रसाधिकाः ।
यस्य ज्ञानं भवद्-भावि-भूतभावावभासकृत् ॥ ३ ॥
10 यस्मिन् विज्ञानमानन्दं, ब्रह्म चैकात्मतां गतम् ।
सः श्रद्धेयः स च ध्येयः, प्रपद्ये शरणं च तम् ॥ ४ ॥
तेन स्यां नाथवाँस्तस्मै, स्पृहयेयं समाहितः ।
ततः कृतार्थो भूयासं, भवेयं तस्य किङ्करः ॥ ५ ॥
तत्र स्तोत्रेण कुर्यां च, पवित्रां स्वां सरस्वतीम् ।
15 इदं हि भवकान्तारे, जन्मिनां जन्मनः फलम् ॥ ६ ॥

अनुवाद

जेमनो आत्मा सर्व संसारी जीवोथी श्रेष्ठ छे, जेओ केवलज्ञानमय छे, जेओ पांच परमेष्ठिओमा प्रधान छे, अने जेमने पंडितजनो अज्ञानरूप अंधकारथी पर तथा सूर्य समान प्रकाशमान (अथवा अज्ञानान्धकारने दूर करवा माटे सूर्य समान प्रकाशमान) माने छे ॥ १ ॥

20 तथा, जेओए (रागद्वेष आदि) क्लेशरूप सर्व वृक्षोने (महामोहरूप) मूलथी उखेडी नाख्या छे अने जेमने सुरेन्द्रो, असुरेन्द्रो, तथा नरेन्द्रो (चक्रवर्तिओ) पण मस्तक नमावीने नमस्कार करे छे ॥ २ ॥

तथा जेमनाथी धर्मादि पुरुषार्थोने प्राप्त करावनारी चौद विद्याओ आ विश्वमा प्रवर्ती अने जेमनु ज्ञान भूत, भविष्य अने वर्तमानकालना सर्व पदार्थोनुं प्रकाशक छे ॥ ३ ॥

तथा, जेमना आत्मामा विज्ञान (केवलज्ञान), आनंद (अव्याबाध सुख) अने ब्रह्म (परमपद) 25 ए त्रणे एकरूपताने पाम्या छे ते श्री अरिहंत परमात्मा (ज) श्रद्धा करवा योग्य छे, ध्यान करवा योग्य छे अने ते परमात्माना (ज) शरणने हु स्वीकारु छुं ॥ ४ ॥

ते परमात्माथी (ज) हुं सनाथ छु, ते परमात्माने ज हु अनन्यहृदयथी चाहुं छु, तेमनाथी ज हुं कृतकृत्य छुं अने तेमनो ज हु सेवक छुं ॥ ५ ॥

ते परमात्माना गुणानुवादथी हुं मारी वाणीने पवित्र करुं, कारण के आ संसाररूप अटवीमा 30 प्राणीओना जन्मनुं ए (भगवत्स्तवन) ज फळ छे. ॥ ६ ॥

श्रीसोमोदयगणिकृतावचूर्णिः

यः परात्मेति० परश्चासावात्मा च परात्मा सर्वसंसारिजीवेभ्यः प्रकृष्टस्वरूपः, पुनः किं विशिष्टः ? परंज्योतिः। परं सकलकर्ममलकालुष्यरहितत्वेन केवलं ज्योतिर्ज्ञानमयं यस्य स तथा, परमिति केवलार्थेऽव्ययम्। परमे चिदानन्दरूपे पदे तिष्ठन्तीति परमेष्ठिनोऽर्हदादयः पञ्च, तेषां परमः प्रधानभूतः (सिद्धः)। परमत्वं चास्य (सिद्धस्य) मुक्तावस्थामधिकृत्य परमेष्ठिनामिति षष्ठी "सप्तमी चाविभागे निर्धारणे" (२-२-१०९) 5 इति सूत्रेण। तथा य वीतरागं तमसः परस्तादामनन्ति ध्यायन्ति तत्स्वरूपोपलब्धये मनीषिणः। क्व ? परस्तात् परस्मिन् पारे, कस्य ? तमसोऽज्ञानरूपस्य, किम्भूत यम् ? आदित्यवर्णमादित्यस्येव वर्णं उद्योतो यस्य तं तथा, भानोरुपमानमन्यस्य तथाविधस्य वस्तुनोऽत्राभावात्, परस्तादिति पठिततमसोऽज्ञानरूपान्धकारस्याग्रे आदित्यवर्णं सूर्याभ तद्विनाशकमित्यर्थः ॥ १ ॥

सर्वे० येन सर्वे समस्ताः क्लेशा रागद्वेषादयस्त एव पादपा वृक्षा नरकादिकटुफलदायित्वेन 10 समूला मिथ्यात्वमूलसहिता उदमूल्यन्त उन्मूलिताः, यस्मै मूर्ध्ना सुरासुरनरेश्वरा नमस्यन्ति-नमस्कुर्वन्ति ॥ २ ॥

प्राव० यतो यत्सकाशाद् विद्या. शब्दविद्यादिकाश्चतुर्दश, धर्मार्थकामादिपुरुषार्थाना च प्रसाधिका विधायिका. प्रावर्त्तन्त अभूवन्, यद्वा द्वादशाङ्गीगता विद्या सुवर्णसिद्ध्यादिप्ररूपिका.। यस्य ज्ञानं भवद्भाविभूतभावावभासकृद्-अतीतानागतवर्त्तमानवस्तुप्रकाशकमस्तीति गम्यम् ॥ ३ ॥

यस्मिन० यस्मिन् विशिष्ट ज्ञानं विज्ञान केवलज्ञानमानन्दमकृत्रिमसुखं ब्रह्म च परमपदं 15 त्रीण्यप्येकात्मनमैक्य गतानि स एव वीतरागजीवः स एव ज्ञानं ज्ञानैकरूपत्वात् तस्य, स एव च सुखं दर्शन-स्पर्शनादिबाह्यस्य कस्यापि तत्राभावात्, स एव परमपद अमुक्तिरूपस्याभावात्। अथ तच्छब्दं दर्शयन्त आहुः, सः श्रद्धेयः स पूर्वोक्तपरात्मादिविशेषणविशिष्टः श्रद्धेयः, स्वहृदयरुचिविषयः कार्यः, च-पुनः स ध्येयो रूपातीततया ध्यातव्यस्त तमसः परस्तादाम्नात शरण प्रपद्ये स्वीकरोमि ॥ ४ ॥

तेन० तेनोन्मूलितक्लेशपादपेन नाथवान् सनाथोऽह स्यां भवामि, तस्मै सुरासुरनमस्कृतायाऽहं 20 समाहितस्तदेकतानमनाः स्पृहयेय वाञ्छामि, ततः प्रकटितपुरुषार्थसाधकविद्यासमुदायादह कृतार्थः कृतकृत्यः प्राप्ताभीष्टकार्यो वा भूयासं भवामि भविष्यामि इत्यर्थः। तस्य त्रिकालज्ञानवतः किङ्करो भवेयमस्मि ॥ ५ ॥

तत्र० तत्र विज्ञानानन्दब्रह्मरूपे स्वा सरस्वती वाणीं, स्तोत्रेण कृत्वा पवित्रां कुर्यां-करोमि। को हेतुः ? हि-यस्मात् कारणाद् भवकान्तारे संसारारण्ये जन्मिना जीवाना, जन्मनः पादपरूपस्य इदमेव वीतरागस्तवनं फलम्, नान्यत् ॥ ६ ॥ 25

श्रीप्रभानन्दसूरिकृतविवरणम्

अत्राद्यसार्द्धश्लोकत्रयस्य पदानां प्रथमादिसप्तम्यन्तविभक्तिप्रथमवचनान्तानामुत्तरश्लोकद्वयस्य तदन्तैरेव पदैर्यथाक्रमं कर्त्तृकर्मविवक्षया योजनं कार्यम्। तथाहि—परमात्मेति विशेष्यं पदम्, अतो यः किल परात्मा परंज्योतिः स श्रद्धेयः। यश्च परमेष्ठिनां परमः स ध्येयः, यं चादित्यवर्णं तमसः 5 परस्तादामनन्ति तं शरणं प्रपद्ये। येन च समूलाः सकलक्लेशपादपाः समुदमूल्यन्त तेन नाथवान् स्याम्। यस्मै च सुरासुरनरेश्वराः सरभसं नमस्यन्ति तस्मै समाहितः स्पृहयेयम्। यतश्च पुरुषार्थप्रसाधिका विद्याः प्रावर्त्तन्त ततः कृतार्थो भूयासम्। यस्य च भवद्भाविभूतभावावभासकृद् ज्ञानं तस्य किङ्करो भवेयम्। यस्मिंश्च विज्ञानमानन्दं ब्रह्म चैकात्मतामुपगतं तस्मिन् स्तोत्रेण स्वां सरस्वतीं पवित्रां कुर्यामिति पदानां परस्परसम्बन्धः।

10 साम्प्रतमेतदेव प्रतिपदं व्याख्यायते। तत्र परश्चासावात्मा च परात्मा परत्वं चास्य देहात्मान्तरात्मापेक्षम्, यतः कैश्चिदुपयोगलक्षणमनादिनिधनं अपौद्गलिकत्वेन रूपातीतं तथाविधसामग्रीसाकल्यात् शुभाशुभरूपस्य कर्मणः कर्त्तारमुदयप्राप्तस्य तस्यैव च भोक्तारमत एवैतल्लक्षणविलक्षणाद्देहादर्थान्तरभूतमविसंवादिप्रमाणप्रतिष्ठितमप्यात्मतत्त्वं महामोहोपहतमतित्वेनामन्यमानैः पिष्टादिद्रव्ययोगान्मदशक्तिमिवाचेतनमहद्भूतसम्पर्काच्चेतनत्वमुद्भाव्य देहस्यैवात्मत्वमुपकल्प्यतेऽतः स देहात्मा। यथा 15 देहातिरिक्तस्यात्मनः सत्प्रमाणप्रतिष्ठितत्वं तथा पुरस्तादष्टमप्रकाशे प्रकाशयिष्यते।

अन्तरात्मा च ज्ञानावरणादिकर्मनिर्मथितमाहात्म्यः शरीरी संसारिजीवः। एतयोश्च वक्ष्यमाणविशेषणगणासहत्वेन प्रकृतानुपयोगित्वमतः परशब्दोपादानम्। परात्मा च विगलितसकलकर्म्ममलपटलः सम्यक्सिद्धज्ञानदर्शनाऽऽनन्दवीर्यलक्षणानन्तचतुष्टयः शिवमचलमपुनर्भवं परमपदमध्यासीनो ज्ञानदर्शनोपयुक्तः केवलात्मैव साम्प्रतं स एव विशिष्यते। किं विशिष्टः परमात्मेत्याह परंज्योतिः, 20 अप्रतिपातित्वेन लोकालोकप्रकाशकत्वेन च परं सर्वोत्कृष्टं चित्स्वरूपं ज्योतिर्यस्येति ज्योतिर्ज्योतिष्मतोरभेदात् स एव परं ज्योतिः। परत्वं चास्य मतिश्रुतावधिमनःपर्यायलक्षणचिदंशचतुष्टयापेक्षं प्रतिपातित्वेनाल्पविषयत्वेन च मत्यादीनामनीदृशत्वात्। यदि वा रवीन्दुविद्युन्मणिप्रमुखे निखिलेऽपि ज्योतिर्वर्गे यः परमुत्कृष्टं ज्योतिरिति स परंज्योतिः। यश्चैवंविधः परात्मा स श्रद्धेयः श्रद्धाविषयमवतारणीय इत्युत्तरपदेन योगः। किमुक्तं भवति? किल यद्यप्यघातिकर्मणामर्हदादीनामध्यक्षे तस्मिं- 25 स्तत् प्रत्ययेनैव श्रद्धा विधेयैव। न चानुपकृतपरानुग्रहकृतां क्षीणरागद्वेषमोहानामर्हदादीनां वितथवादित्वमतः किमश्रद्धेयं परमात्मनः?। पुनः परमरहस्यभूतं परमात्मानमेव विशिनष्टि। परमः परमेष्ठिनाम्। परमे चिदानन्दरूपे ब्रह्मणि तिष्ठन्तीति परमेष्ठिनस्ते चार्हदाचार्योपाध्यायसाधव एव, तेषां मध्ये परमः प्रकृष्टः सिद्धरूपो यः परमेष्ठी, अर्हदादिपरमेष्ठिचतुष्टयस्य चामुक्ततावस्थामधिकृत्य सिद्धस्य पञ्चपरमेष्ठिनः परमत्वम्। मुक्तास्तु सर्वेऽप्येकरूपा एव। स चैवंविधः परमात्मा भगवां- 30 स्तदेकतानमनोभिर्ध्येयस्तत्स्वरूपप्राप्तये सततमनुस्मरणीय इति उत्तरपदेन सम्बन्धः।

प्रथमान्तं पदमभिधाय द्वितीयान्तमाह। यं च परमात्मानमणिमाद्यष्टमहासिद्धिप्रसिद्धिमहसो मुनयोऽप्यामनन्ति—तत्स्वरूपोपलब्धये संततमभ्यस्यन्ति। किम्भूतम्? तमसः परस्ताद् वर्तमानम्, तमांसि निकाचितानि कर्माणि विमलकेवलाऽऽलोकेन च तेषां पारे प्रतिष्ठितं सत्त्व-रजस्तमोगुणत्रयातीतमित्यर्थः। तमहमेवंरूपं परमात्मानं दुर्वारान्तरापरित्याजितात्मशक्तिः शरणं प्रपद्ये इत्युत्तरेण 35 योगः। पुनः किं विशिष्टम्? आदित्यवर्णं, आदित्यस्य प्रभापतेरिव वर्णः शोभा यस्य स तथा तम्। अत्राह परः—'ननु परिमितक्षेत्रमात्रप्रकाशनमहसा मिहिरेण लोकालोकप्रकाशनप्रवरपरमज्योतीरूपस्य परमात्मनः साम्यमनुपपन्नम्। तथा चागमः—

"चंदाइच्चगहाणं, पहा पयासेइ परिमियं खेत्तं ।
केवलियनाणलम्भो, लोयालोयं पयासेइ" ॥ १ ॥

इति'। आचार्यः—साधु, भोः सहृदय ? हृदयङ्गममिदधासि, केवलं सकलेऽपि कलावत्प्रमुखे तेजस्विवर्गे विगणयद्भिरस्माभिर्मनोरेव किमपि तदुपमानलवलाभसम्भावनास्वादत्वमुपलब्धमित्या-दित्यवर्णमित्यभिहितं, तत्त्वतस्तु सुमेरुपरमाण्वोरिव महदन्तरं परमात्मद्वादशात्ममहसोरिति । 5 आदित्योऽपि निरस्ततमस्त्वेन तमसः परस्ताद् भवति ।

तृतीयान्तं पदमाह । येन च भगवता परमात्मना क्लेशपादपाः सर्वेऽप्युदमूल्यन्त । "अविद्या-ऽस्मितारागद्वेषाभिनिवेशाः क्लेशाः ।" तत्र "अनित्याशुचिदुःखानात्मसु मिथ्याज्ञानमविद्या, दुर्धरा-हंकारवशात् सर्वत्राऽस्मीति भावोऽस्मिता, मनोज्ञेषु शब्दादिष्वात्मनो गाढाभिष्वङ्गो रागः, तेष्वेवामनोज्ञेषु भृशमप्रीतिविशेषो द्वेषः, अतत्त्वेऽपीदमित्थमेवेत्येकान्ताग्रहग्रहिलताऽभिनिवेशः"। 10 उपलक्षणं चैतदन्यासामपि घातिकर्मोत्तरप्रकृतीनाम् । एते च संसृत्यामात्मनोऽनादिसम्बन्धवशाद् बद्धमूलाः, प्रदर्शिततत्तद्विकारप्ररोहसंहतयः, स्फुरदाध्यात्मिकाधिभौतिकाधिदैविकवेदनोदयप्रसून-संततयः, प्रकाशितामुष्मिकदुर्गदुर्गतिदुःखफलपटलाः पादपा इव पादपाः । ते च सङ्गत्यागादा-केवलोत्पत्ति त्रिजगदप्रतिमल्लहस्तिमल्लेन येन भगवता दुस्तपतपोऽन्दोलनेन (?) चलाचलतामापाद्य शुक्लध्यानसमुद्दण्डशुण्डाम्रेडनेन समूलाः सहेलमुन्मूलितास्तेन त्रिजगन्नाथेनाहमपि नाथवान् स्यां 15 भवेयमित्युत्तरेण योगः । येनासौ मामलब्धानां ज्ञानादिगुणानां लम्भनेन तेषामेव च लब्धानां परिपालनात्साननुगृह्णाति ।

चतुर्थ्यन्तं पदमाह—मूर्ध्ना यस्मै नमस्यन्ति सुरासुरनरेश्वराः । यस्मै समूलोन्मूलितक्लेश-पादपाय भगवते सुरासुरनरेश्वराः । देवदानवमानवपतयः सकलक्लेशजालोच्छित्तिनिमित्तं मूर्ध्ना उत्तमाङ्गेन सरभसं नमस्यन्ति । तस्मै त्रिभुवनसनातनगुरवे समाहितस्तदेकतानमानसोऽहमपि 20 स्पृहयेयं, प्रणामादिनिमित्तं स्पृहामावहामीत्युत्तरेण सम्बन्धः । इदमुक्तं भवति । किल यद्यपि सुरासुरेश्वरादिवत् प्रत्यक्षार्हत्प्रमाणादिसामग्री दुःषमा-समयसमुद्भूतस्य ममासंभविनी तथापि "मनोरथानामगतिर्न विद्यते" इति न्यायात् स्पृहामात्रमपि तावद् धारयामि येन सदभ्यस्ततया भवान्तरेऽपि संस्कारोऽयमनुवर्तेत इति ।

पञ्चम्यन्तं पदमाह—प्रावर्त्तन्त यतो विद्याः पुरुषार्थप्रसाधिकाः । यतो यस्मात् सर्वविदः 25 परमपुरुषात् पुरुषार्थानां धर्मार्थ-काम-मोक्षलक्षणानां प्रसाधिकास्तदुपायोपदर्शिन्यो विद्याः शब्दविद्यादिकाः प्रावर्त्तन्त प्रादुरासन् । यतो द्वादशाङ्गीमूलनीवीमुत्पादादित्रिपदीं तदुचितेषु भगवान् स्वयमुदीरयति । न च द्वादशाङ्गीव्यतिरिक्तमन्यदपि विद्याङ्गमस्तीत्यतः समस्तविद्यानां भगवानेव प्रभवः । अतएव ततस्तस्मात् परमपुरुषानुध्यानादहमपि पुमर्थोपलब्ध्या कृतार्थः कृतकृत्यो भूयासमित्युत्तरेण योगः । पुरुषार्थोपायोपलब्ध्या च कृतकृत्यता समीचीनैवेति । 30

षष्ठ्यन्तं पदमाह—यस्य ज्ञानं भवद्भाविभूतभावावभासकृत् । यस्य भगवतः परमात्मनो घातिकर्मणामात्यन्तिकक्षयादुत्पन्नं ज्ञानं देशकालस्वभावविप्रकर्षैरनन्तरितमत एव भवद्भाविभूतभावा-वभासकृद् वर्त्तमानानागतातीतपदार्थसार्थप्रकटनपटिष्ठम् । तस्यैवम्भूतस्याहं किङ्करो भवेयमित्युत्तरेण योगः । अत्रायमाशयः—किलास्मिन् जगति यस्य विसंवादित्वेन नानैकान्तिकोऽष्टाङ्गनिमित्तमात्राव-भासनपरो ज्ञानांशः स्यात् सोऽपि तदर्थिभिः प्रेष्यैरिव प्रतिक्षणमुपास्यते । यस्य च भगवतः 35 प्रागुपवर्णितस्वरूपं ज्ञानं तस्य किङ्करत्वमनुत्तरसुरा अपि कुर्युः । किमङ्ग ! मादृशोऽङ्गभागिति ।

सप्तम्यन्तं पदमाह—यस्मिन् विज्ञानमानन्दं ब्रह्म चैकाङ्ग[त्म]तां गतम् । यस्मिंश्च भगवति परमपरमेष्ठिनि विज्ञानमानन्दं ब्रह्म चैकात्मतां गतम् । तत्र मत्यादिज्ञानेभ्यः क्षायिकत्वेनाप्रतिपातित्वेना-

नन्तद्रव्यपर्यायगोचरत्वेन च विशिष्टं केवलालोकलक्षणं ज्ञानं विज्ञानम्। आनन्दं चात्मनः कदाप्य-लब्धपूर्वस्वरूपलाभसमुद्भवमितरकारणकलापनिरपेक्षमनुपाधि मधुरमक्षयमात्यन्तिकं सुखमेव। ब्रह्म च परमं पदम्। यदा च भवोपग्राहिकर्मपारवश्याद्‌द्यापि भवस्थः केवली भवति तदास्मिन् भगवति केवलिनि विज्ञानमानन्दं च वर्त्तते। अयं च परमं पदं गमिष्यतीत्यात्मविज्ञानानन्दब्रह्मणां मिथः
5 पृथग्भावः स्यादेव। शैलेश्यनन्तरं च सकलकर्मांशप्रक्षयादक्षयं पदमुपेयुष्यस्मिन् विज्ञानमानन्दं ब्रह्म चैकात्मतां याति स एव परमात्मा, स एव विज्ञानं, स एवानन्दः, स एव परमं ब्रह्मेत्यभिन्नभावतां भजते। अतस्तत्र तस्मिन् पूर्वोपवर्णितस्वरूपे परमात्मनि स्तोत्रेण यथार्थवादेनाहं स्वामात्मीयां सरस्वतीं वाणीं पवित्रां पावनीं कुर्यां — विदध्यामित्युत्तरेण सम्बन्धः। ननु किमस्याः प्रथमं किमप्य-पूतत्वमस्तीत्युच्यते। स्वकर्मपरिणामेनाभ्यावृत्त्या भवे बंभ्रम्यमाणानां प्रबलज्ञानावरणोदयाद् विशिष्ट-
10 चित्तचैतन्यशून्यानामसुमतामसुलभैव कवित्ववक्तृत्वसरसा सरस्वती, यदा च तथाभव्यत्ववैचित्र्यात् संघटितापि भवाभिनन्दिनां सुरनरादीनामसद्भूतगुणोद्भावनेनात्मानं मलिनयति, तदा परमात्मप्रभृति-स्तुत्यवर्गस्तुतिप्रयोगमन्तरेण किमन्यदघमर्षणमस्यास्ततः तत्र स्तोत्रेणेत्युक्तम्। किञ्च अस्मिन् भवकान्तारे संसारारण्ये जन्मिनां सत्क्षेत्राद्येकादशाङ्गीसङ्गतस्य जन्मनोऽवतारस्यापीदं सद्भूतं वस्तुतत्त्वोद्भावनमेव फलम्।

15 ## परिचय

कलिकालसर्वज्ञ भगवान् श्रीहेमचन्द्राचार्यना श्री 'वीतरागस्तोत्र' थी कोण विद्वान् अपरिचित हशे? महाराजा कुमारपालनी दैनिक प्रार्थना माटे रचवामा आवेल ए ग्रथरत्ननुं आजे पण अनेक महात्माओ भावपूर्वक प्रतिदिन पारायण करे छे। रोज सवारमां आ ग्रथनु संपूर्ण पारायण न थाय त्यासुधी मोढामा काइ पण न नाखवानो श्रीकुमारपाल महाराजानो दृढ अभिग्रह हतो। आ ग्रंथ साहित्य, भक्ति वगेरे सर्व दृष्टिए
20 परिपूर्ण छे।

श्री वीतरागस्तोत्रनी एक प्रत श्रीसोमोदयगणिकृत अवचूर्णि अने श्रीप्रभानन्दसूरिकृत विवरण साथे श्री केसरबाई ज्ञानमंदिर, पाटण, तरफथी वि. सं. १९९८ मा प्रकाशित थई छे। तेमांथी प्रस्तुत संदर्भ तारवीने अहीं रजू कर्यो छे।

समवसरणरचनास्थित ॐ ह्रीँ अर्हँ स्वरूपम्

भट्टारक-श्रीसकलकीर्तिरचित-'तत्त्वार्थसारदीपक'-महाग्रन्थस्य संदर्भः

[पदस्थ—भावना प्रकरणम्]

अथ पिण्डस्थमाख्याय, वक्ष्ये पदाक्षरोद्भवम् ।
ध्यानं पदस्थमत्यन्तस्वाधीनं मुक्तये सताम् ॥ ३३ ॥ 5
पदान्यादाय साराणि, योगिभिर्यद् विधीयते ।
सिद्धान्तबीजभूतानि, ध्यानं पदस्थमेव तत् ॥ ३४ ॥
ध्यायेदनादिसिद्धान्तविख्यातां वर्णमातृकाम् ।
आदिनाथमुखोत्पन्नां, विश्वागमविधायिनीम् ॥ ३५ ॥
पत्रषोडशसंयुक्ते, कमले नाभिमण्डले । 10
प्रतिपत्रं भ्रमन्तीं स, स्मरेद् द्वयष्टस्म(स्व)रावलीम् ॥ ३६ ॥
'अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ॡ, ए, ऐ, ओ, औ, अं, अः ॥'

अनुवाद *

पिण्डस्थ ध्यान विशे जणाव्या पछी—हवे हुं पद अने अक्षरोथी (अथवा पदना अक्षरोथी) उत्पन्न थता एवा 'पदस्थ ध्यान' विशे कहीश । ए (पदस्थ ध्यान) अत्यंत स्वाधीन छे तेथी ते 15 सत्पुरुषोने मुक्ति माटे (सुसाध्य) थाय छे ॥ ३३ ॥

सिद्धान्तना बीजभूत सार पदोने अवलम्बीने योगीओ जे ध्यान करे छे, ते ज 'पदस्थ ध्यान' कहेवाय[1] छे ॥ ३४ ॥

वर्णमालानुं ध्यान

श्री आदिनाथ भगवंतना मुखथी निकळेली, सघळा आगमोनी रचना करनारी अने अनादि- 20 सिद्धान्तमां विख्यात एवी वर्णमातृका (सिद्धमातृका)नुं ध्यान करवुं जोईए[2] ॥ ३५ ॥

नाभिमंडळमां सोळ पत्रवाळा कमळना प्रत्येक पत्र उपर अनुक्रमे फरती सोळ स्वरोनी श्रेणिनुं स्मरण करवुं[3] ॥ ३६ ॥

ते सोळ स्वरो आ प्रकारे छे—'अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः ।'

* ग्रन्थकारे पदस्थ-ध्यान विषे 'ज्ञानार्णव'नो आधार लीधो होय एम लागे छे, कारण के केटलाये श्लोकोनु 25 थोडा फेरफार साथे आमां निरूपण छे । तेनी सरखामणी माटे 'ज्ञानार्णव'ना प्रकरण ३८ पृ. ३८७ थी श्लोकोनो अंक अहीं नोंधीए छीए ।

१. ज्ञा. श्लो. १ । २. ज्ञा. श्लो. २ । ३. ज्ञा. श्लो. ३ ।

चतुर्विंशतिपत्राढ्ये, कञ्जे सत्कर्णिके हृदि ।
पञ्चविंशान् ककारादि-मान्तान् ध्यायेत् स व्यञ्जनान् ॥ ३७ ॥
ततो वदनराजीवे, हैमे पत्राष्टभूषिते ।
चिन्तयेच्छेषवर्णाष्टौ, यकारादीन् प्रदक्षिणम् ॥ ३८ ॥
इमां प्रसिद्धसिद्धान्तप्रसिद्धां वर्णमातृकाम् ।
ध्यायेद् यः स श्रुताम्भोधेः, पारं गच्छेच्च तत्फलात् ॥ ३९ ॥
अथ मन्त्रं गणाधीशं, विश्वतत्त्वैकनायकम् ।
आदिमध्यान्तसद्भेदैः, स्वरव्यञ्जनसंभवम् ॥ ४० ॥
ऊर्ध्वाधोरेफसंयुक्तं, सकलं बिन्दुभूषितम् ।
एकाग्रमनसा ज्ञानिन् ! मन्त्रराजमिमं स्मर ॥ ४१ ॥

हृदयमा सुंदर कर्णिका सहित चोवीश पत्रवाळा कमळमा 'क' थी 'म' सुधीना पचीश व्यञ्जनोनु तेणे (योगीए) ध्यान करवु[1] ॥ ३७ ॥

ए पछी मुखमा सुवर्णकमळना आठ पत्रोमा प्रदक्षिणारूपे (क्रमशः फरता) बाकी रहेला 'य' आदि (य र ल व श ष स ह) आठ वर्णोनु चिंतन करवु[2] ॥ ३८ ॥

फलश्रुति

आ प्रकारनी (उपर जणावेली) प्रसिद्ध सिद्धांतोमा विख्यात एवी वर्णमातृकानुं जे पुरुष ध्यान करे ते तेना फलस्वरूपे श्रुतसागरना पारने पामे[3] ॥ ३९ ॥

मन्त्राधिराज हँ

हवे गणाधीश मन्त्र (हँ विशे जणावे छे के—) जे सर्व तत्त्वोनो मुख्य नायक छे, जे आदि (अ), मध्य (र्) अने अंत (ह)—ए रीते थता भेदो वडे स्वर अने व्यञ्जनथी उत्पन्न थाय छे[4], जे उपर अने नीचे रेफथी युक्त छे, जे कलाथी सहित छे अने जे बिन्दुथी शोभे छे; ते आ मन्त्रराज[5] (हँ) नु हे ज्ञानी! तुं एकाग्र मनथी स्मरण कर[6] ॥ ४०–४१ ॥

---

१. ज्ञा. श्लो. ४ । २. ज्ञा. श्लो. ५ । ३. ज्ञा. श्लो. ६ । ४. ज्ञा. श्लो. ७ ।

५. 'ब्रह्मविद्याविधि' नामक अप्रकट जैन ग्रंथमा आ 'हँ'ने मन्त्रराज तरीके ओळखावता जणाव्यु छे के—

ऊर्ध्वाधोरेफमाक्रान्तं, सकलं बिन्दुलाञ्छितम् ।
अनाहतयुतं तत्त्वं मन्त्रराजं प्रचक्षते ॥ हँ ॥
—ह. लि. पत्र ९

६. ज्ञा. श्लो. ८ ।

देवाम(सु)रनतं मिथ्यादुर्बोधध्वान्तभास्करम् ।
शुक्लं मूर्द्धस्थचन्द्रांशुकलापव्याप्तदिङ्मुखम् ॥ ४२ ॥
हेमाब्जकर्णिकासीनं निर्मलं दिक्षु खाङ्गणे ।
संचरन्तं च चन्द्राभं, जिनेन्द्रतुल्यमूर्जितम् ॥ ४३ ॥
ब्रह्मा कैश्चिद्धरिः कैश्चिद्, बुद्धः कैश्चिन्महेश्वरः । 5
शिवः सर्वैस्तथेशानो, वर्णोऽयं कीर्तितो महान् ॥ ४४ ॥
मन्त्रमूर्तिं किलादाय, देवदेवो जिनः स्वयम् ।
सर्वज्ञः सर्वगः शान्तः, साक्षादेष व्यवस्थितः ॥ ४५ ॥ 'ह्रँ' ॥
ज्ञानबीजं जगद्वन्द्यं, जन्म-मृत्यु-जरापहम् ।
अकारादि-हकारान्तं, रेफबिन्दुकलाङ्कितम् ॥ ४६ ॥ 10
भुक्ति-मुक्त्यादिदातारं, स्रवन्तममृताम्बुभिः ।
मन्त्रराजमिमं ध्यायेद्, धीमान् विश्वसुखावहम् ॥ ४७ ॥

(ते मंत्र) देवो अने असुरो वडे नमस्कार करायेल, मिथ्याज्ञानरूप अन्धकार (ने दूर करवा) माटे सूर्य समान, पोताना उपर रहेला चन्द्र(कला)माथी नीकळता किरणोना समूह वडे दिगन्तोने व्याप्त करतो, सुवर्णकमलनी कर्णिकामा विराजमान, निर्मल, दिशाओमा अने आकाशरूपी आंगणामा संचरता चन्द्र समान, 15 परम सामर्थ्यशाळी अने श्रीजिनेन्द्रतुल्य छे[1] ॥ ४२—४३ ॥

आ महान् वर्ण (ह्रँ) ने ज केटलाक ब्रह्मा, केटलाक हरि, केटलाक बुद्ध, केटलाक महेश्वर, केटलाक शिव तथा केटलाक ईशान कहे छे[2] ॥ ४४ ॥

खरेखर ! आ मंत्रना रूप(आकृति)ने धारण करीने स्वयं देवाधिदेव, सर्वज्ञ, सर्वव्यापी अने शान्त एवा श्री जिनेश्वर भगवान् साक्षात् रहेला छे[3] ॥ ४५ ॥ ते मन्त्र आ छे—'ह्रँ'। 20

मन्त्राधिराज अर्हँ

(अथवा) बुद्धिमान पुरुषे जेनी आदिमा 'अ' छे, अंतमा 'ह' छे अने जे रेफ, कला अने बिन्दुथी सहित छे; जे ज्ञानबीज छे; जगद्वंद्य छे; जन्म, मृत्यु अने जराने दूर करनार छे; भुक्ति (सांसारिक सुखो) तेमज मुक्तिने आपनार छे; जेमाथी अमृतजळ झरी रह्यु छे अने जे सर्व सुखोने लावनार छे, ते आ मन्त्रराज 'अर्हँ' नुं ध्यान करवुं जोईए[4] ॥ ४६-४७ ॥ 25

१. ज्ञा. श्लो. ९-१० । २. ज्ञा. श्लो. ११ । ३ ज्ञा. श्लो. १२ । ४ ज्ञा. श्लो. १३ ।

नासाग्रे निश्चलं वा भ्रूलतान्तरे महोज्ज्वलम् ।
तालुरन्ध्रेण वाऽऽयान्तं, विशन्तं वा मुखाम्बुजे ॥ ४८ ॥
सकृदुच्चारितो येन, मन्त्रोऽयं वा स्थिरीकृतः ।
हृदि तेनापवर्गाय, पाथेयं स्वीकृतं परम् ॥ ४९ ॥
5 यदैवेष महामन्त्रश्चित्ते धत्ते स्थितिं मुनेः ।
तदैव कर्मसन्तानप्रारोहः प्रविशीर्यते ॥ ५० ॥
मत्वेतीदं महत्तत्त्वमर्हनामोद्भवं बुधाः ।
विश्वकल्याणतीर्थेशं, श्रीदं ध्यायन्तु मुक्तये ॥ ५१ ॥
सर्वावस्थासु सर्वत्र, जपन्तु वा निरन्तरम् ।
10 विशुद्धे मानसे मन्त्रं, निश्चलं स्थापयन्तु वा ॥ ५२ ॥ 'अर्हं' ॥
ततो हकारमात्रं च, रेफ-बिन्दु-कलोज्झितम् ।
सूक्ष्मं प्रभास्वरं चन्द्ररेखाभं शान्तिकारणम् ॥ ५३ ॥
अणिमादिमहर्द्धीनां, जनकं चिन्तयेत् सुधीः ।
अनुच्चार्य हृदा नित्यं, भवभ्रमणहानये ॥ ५४ ॥ 'ह' ॥

---

15 ते मन्त्रराज नासिकाना अग्रभाग पर स्थिर छे, अथवा भ्रूमध्यमा अत्यन्त प्रकाशमान छे, अथवा तालुरन्ध्रथी आवे छे अने मुखकमलमां प्रवेश करे छे, एवुं ध्यान करवुं ॥ ४८ ॥

जेणे एक ज वार आ मन्त्रनो उच्चार कर्यो छे अथवा हृदयमां स्थिर कर्यो छे ते पुरुषे मोक्ष माटे उत्तम भातुं ग्रहण कर्युं[2] छे ॥ ४९ ॥

मुनिना चित्तमां आ महामंत्र स्थिरता करे त्यारथी ज (अर्थात् मुनिना चित्तमा आ महामत्रनी 20 स्थिरता थतानी साथे ज) कर्मोनी परंपरानो अंकुरो खरवा मांडे छे[3] ॥ ५० ॥

ए रीते अर्हं नाममांथी उत्पन्न थयेला आ महातत्त्वने जाणीने विश्वनु कल्याण करवामा श्री तीर्थंकर स्वरूप अने मोक्ष (अने भुक्ति) ने आपनार एवा ते तत्त्व(अर्हं)नु विद्वानोए मुक्ति माटे ध्यान करवुं जोईए ॥ ५१ ॥

अथवा सर्व अवस्थाओमां सर्वत्र निरतर ते मन्त्राधिराजनो जाप करवो जोईए । अथवा विशुद्ध 25 मनमां ते मन्त्रने निश्चल रीते स्थापवो जोईए ॥ ५२ ॥ ते मन्त्र आ छे—'अर्हं'

'ह' कार

ते पछी बुद्धिमान पुरुष संसारभ्रमणनी हानि माटे उच्चार कर्या विना मन वडे केवल हकारने रेफ, कला अने बिन्दुथी रहित, सूक्ष्म, प्रकाशमान अने चन्द्ररेखा जेवो चिंतवे । आवो 'ह'कार शान्ति अने अणिमादि महर्द्धिओनुं कारण छे[4] ॥ ५३-५४ ॥ ते मन्त्र आ छे—'ह' ।

---

१ ज्ञा. श्लो. १६ । २ ज्ञा. श्लो. १४ । ३ ज्ञा. श्लो. १५ । ४. ज्ञा. श्लो. २१ ।
५. ज्ञा. श्लो. २-३, पृ. ३९२ ।

ॐकारं विस्फुरच्चन्द्रकलाबिन्दुमहोज्ज्वलम् ।
नामाग्राक्षरनिष्पन्नं, पञ्चानां परमेष्ठिनाम् ॥ ५५ ॥
धर्मार्थकाममोक्षाणां, दातारं विश्वपूजितम् ।
हृत्कञ्जकर्णिकासीनं, ध्यायेद् ध्यानी शिवाप्तये ॥ ५६ ॥
अर्हन्तो ह्यशरीराश्चाचार्या विश्वनतक्रमाः । 5
उपाध्यायाः गताः पारं, श्रुताब्धेर्मुनयः परे ॥ ५७ ॥
एषां पंचनमस्कारपदानां प्रथमाक्षरैः ।
निष्पादितोऽयमोङ्कारो, बुधैः सर्वार्थसिद्धिदः ॥ ५८ ॥
एष मन्त्रो जगत्ख्यातः, कामदः कामधेनुवत् ।
ध्यानीनां कल्पशाखीव, समीहितफलप्रदः ॥ ५९ ॥ 10
चिन्तामणिरिवाभीष्टसिद्धिकृन्मूलमन्त्रजः ।
ध्यातव्योऽनिशमत्यर्थं, सर्वकार्यार्थसिद्धये ॥ ६० ॥
स्तम्भनेऽयं सुवर्णाभो, विद्वेषे कज्जलप्रभः ।
वश्यादिकरणे रक्तो, ध्येयः शुभ्रोऽथ हानये ॥ ६१ ॥

'ॐ'कार 15

अथवा ध्यानी पुरुष विस्फुरायमाण चन्द्रकला अने बिन्दु वडे महोज्ज्वल अने हृदयकमलनी कर्णिकामा विराजमान एवा ॐकारनु मोक्ष माटे ध्यान करे । ते ॐकार पांच परमेष्ठिओना नामना प्रथमाक्षरो (अ + अ* + आ + उ + म् +) थी निष्पन्न, विश्व वडे पूजित अने धर्म, अर्थ, काम अने मोक्षने आपनार छे[1] ॥ ५५-५६ ॥

विश्व जेमना चरणोमा नम्युं छे एवा **अरिहंतो, अशरीरी—सिद्धो** तथा **आचार्यो**, श्रुतसिंधुना 20 पारने पामेला **उपाध्यायो** अने श्रेष्ठ **मुनिओ**—ए पंचनमस्कार (नमस्कार महामत्र)ना पदोना प्रथम अक्षरो वडे (गणधरादि) बुद्धिमान पुरुषोए सर्व प्रयोजनोनी सिद्धिने आपनार आ ॐकारने निष्पादित कर्यो छे ॥ ५७—५८ ॥

आ मत्र जगतमा विख्यात, कामधेनुनी जेम इच्छित वस्तुओने आपनार अने ध्यानी पुरुषोने कल्पवृक्षनी जेम समीहित—वाछित फलने आपनार छे ॥ ५९ ॥ 25

मूलमत्रमाथी उत्पन्न थयेल आ ॐकार चिन्तामणिनी जेम वाछितोनी सिद्धिने करनार छे । तेथी सर्व कार्यो अने अर्थोनी सिद्धि माटे प्रतिदिन एनुं घणु ध्यान करवु जोईए ॥ ६० ॥

स्तम्भनमां सुवर्णसदृश कांतिवाळो, विद्वेषमा काजळ समान प्रभावाळो, वशीकरणादिमां रक्त अने पापनाश माटे शुभ्र ॐकार ध्येय छे[2] ॥ ६१ ॥

---

* अशरीरी । + मुनि । १ ज्ञा. श्लो. ३३ । २. ज्ञा. श्लो. ३७ । 30

अथवैषोऽनिशं ध्येयः, सर्वत्रैव शशिप्रभः ।
कर्मारिहानये कृत्ये, किमसत्कल्पनैः सताम् ॥ ६२ ॥ ॐ ॥
महापञ्चगुरोर्नाम, नमस्कारसुसंभवम् । (१)
महामन्त्रं जगज्ज्येष्ठमनादिसिद्धमादिमम् ॥ ६३ ॥
5 ध्यायन्तु वा जपन्तूच्चैर्दक्षाः सर्वार्थसाधकम् ।
युक्त्या कमलजाप्येन, वशीकृत्य चलं मनः ॥ ६४ ॥
मस्तकस्थे स्फुरच्चन्द्राभेऽब्जे पत्राष्टभूषिते ।
स्थापयेत् कर्णिकामध्येऽर्हन्तं पूर्वादिदिक्षु च ॥ ६५ ॥
चतुर्षु पद्मपत्रेषु, सिद्धं सूरिमनुक्रमात् ।
10 उपाध्यायं परं साधुं, विदिक्पत्रेषु दर्शनम् ॥ ६६ ॥
ज्ञानं वृत्तं तपो ध्यानी, स्थापयेद् ध्यानसिद्धये ।
कर्णिकायां जपेद् ध्यायेद्, वाऽऽदौ मन्त्रं च्युतोपमम् ॥ ६७ ॥
महापञ्चगुरूणां पञ्चत्रिंशदक्षरप्रमम् ।
उच्छ्वासैस्त्रिभिरेकाग्रचेतसा भवहानये ॥ ६८ ॥
15 ततश्चतुर्दिशापत्रेषु मन्त्राँश्चतुरः स्मरेत् ।
क्रमाद् विदिक्षु पत्रेषु, नमस्काराँश्चतुःप्रमान् ॥ ६९ ॥

अथवा रोज सर्वत्र चद्र समान प्रभावाळा ॐकारनु ज कर्मशत्रुना नाश माटेना कृत्यमा ध्यान करवु जोईए । सत्पुरुषोने बीजी असत् कल्पनाओनु शु प्रयोजन ? ॥ ६२ ॥ ॐ ॥

नमस्कार महामत्रमां रहेला (अरिहन्त–सिद्ध–आयरिय–उवज्झाय–साहू रूप) पांच महागुरुओना 20 नामथी निष्पन्न थयेल महामत्र के जे जगतमा श्रेष्ठ छे, अनादि-सिद्ध छे, आदिम छे अने सर्व अर्थोनो साधक छे, तेनु दक्ष पुरुषोए कमलजाप वडे युक्तिपूर्वक चचल मनने वश करीने जाप अथवा ध्यान करवुं जोईए ॥ ६३-६४ ॥

मस्तकमा रहेला (ब्रह्मरन्ध्रचक्रमा), स्फुरायमान चन्द्र जेवा, आठ पत्रोथी शोभता कमळनी कर्णिकामा वच्चे अर्हंत भगवतने स्थापन करवा अने पूर्व आदि दिशाओमाना चार पत्रोमा अनुक्रमे सिद्ध 25 भगवंत, सूरि भगवत, उपाध्याय भगवंत अने साधु भगवतने स्थापन करवा; तेमज विदिशाओनी पाखडी-ओमा अनुक्रमे दर्शन, ज्ञान, चारित्र अने तपने ध्यानी पुरुषे ध्याननी सिद्धि माटे स्थापन करवा। ते पूर्वे प्रथमतः कर्णिकामा निरुपम एवा पाच महागुरुओना पात्रीश अक्षर प्रमाण (मत्र)नो त्रण श्वासोच्छ्वासमा एकाग्रचित्तथी भवनी हानि माटे जाप करवो अथवा ध्यान करवु ॥ ६५-६८ ॥

ए पछी चार दिशाना पत्रोमाना चार मंत्रोनु स्मरण करवु अने ते पछी क्रमशः विदिशाओना 30 पत्रोमां चार प्रकारना नमस्कारनु चिंतन करवुं (१) ॥ ६९ ॥

---

१. शा. श्लो. ४०।

अनेन विधिना भाले, मुखे कण्ठे हृदि स्फुटम् ।
नाभौ पद्मे च संस्थाप्यं, मन्त्रं नवनवोत्तमम् ॥ ७० ॥
नमस्काराञ्जपेद् दक्षोऽवरोहाऽऽरोहणेन च ।
द्वि-षट्पद्मेषु सर्वेऽमी, नमस्काराश्च पिण्डिताः ॥ ७१ ॥
विश्वकल्याणदाः सन्ति, ह्यष्टोत्तरशतप्रमाः । 5
कृत्स्नकर्मारिसंतानं, घ्नन्तो विश्वशुभावहाः ॥ ७२ ॥
जाप्येन कमलाख्येनानेन योगी लभेत भोः ।
भुञ्जानोऽप्युपवासस्य, कर्मणां निर्जरां पराम् ॥ ७३ ॥
अपराजितमन्त्रोऽयं, विश्वमन्त्राग्रिमो महान् ।
निरौपम्यो जगत्ख्यातो, जगद्वन्द्यो जगद्धितः ॥ ७४ ॥ 10
अनेन मन्त्रवज्रेण, हता दुःकर्मपर्वताः ।
शतखण्डं क्रमाद् यान्ति, योगिनां मुक्तिरोधकाः ॥ ७५ ॥
महामन्त्रप्रभावेन, विघ्नजालान्यनन्तशः ।
दुष्टारि-नृप-चौरादिजानि नश्यन्ति तत्क्षणम् ॥ ७६ ॥

आ विधिए भालपद्ममां, मुखपद्ममां, कंठपद्ममां, हृदयकमलमां अने नाभिकमलमां नवनवी रीते 15 उत्तम (?) एवा मंत्रने स्पष्ट स्थापन करवा (?) ॥ ७० ॥

कुशल मनुष्ये अवरोह अने आरोहपूर्वक नमस्कारनो जाप करवो। बार पद्मोमां आ बधा नमस्कारोनो समावेश थयेलो छे ॥ ७१ ॥

एक सो ने आठ संख्या प्रमाण नमस्कारो (नो जाप) जगतनु कल्याण करनार, समस्त कर्मरूप शत्रुओनी परंपरानो नाश करनार अने सर्व शुभने लावनार थाय छे ॥ ७२ ॥ 20

आवी रीते 'कमल' जापथी आ मंत्रनो जाप करतो योगी पुरुष उपवासी न होवा छतां उपवासनु फळ मेळवे छे; अने कर्मनी उत्तम निर्जरा करे छे ॥ ७३ ॥

आ 'अपराजित' मंत्र सघळा मंत्रोमां प्रथम छे, महान् छे, अनुपम छे, जगतमां प्रसिद्ध छे, जगत (ना पुरुषो) ने वंदनीय छे अने जगतनु हित साधनारो छे ॥ ७४ ॥

आ मंत्ररूप वज्र वडे, योगीओने मुक्तिमार्गमां रोध करनार दुष्कर्मरूप पर्वतो भेदाई जतां क्रमशः 25 सेंकडो टुकडाने पामे छे (अर्थात् कर्मोना चूरेचूरा थई जाय छे) ॥ ७५ ॥

आ महामंत्रना प्रभावथी दुष्ट, शत्रु, राजा अने चोरथी उत्पन्न थयेल अनन्त प्रकारना विघ्नोनी जाळो तत्क्षण नाश पामी जाय छे ॥ ७६ ॥

---

१. ज्ञा० श्लो० ४७ ।

ग्रह-व्यन्तर-शाकिन्यादयो दुष्टाश्च निर्जराः ।
सन्मन्त्रजपनेनाहो, कर्तुं नोपद्रवं क्षमाः ॥ ७७ ॥
सतां मन्त्रमहाशक्त्या, नागा व्याघ्रा गजादयः ।
कीलिता इव जायन्ते, चोपसर्गा अनेकशः ॥ ७८ ॥
5 दुःसाध्याः सकला रोगाः, कुष्ठ-शूलादयोऽशुभाः ।
क्षणाद् यान्ति क्षयं पुंसां, मन्त्रध्यानमहौषधात् ॥ ७९ ॥
मन्त्रजाप्याम्बुभिः सिक्ताः, शाम्यन्ति वह्नयोऽखिलाः ।
जल-स्थलभयाः सर्वे, विलीयन्तेऽस्य शक्तितः ॥ ८० ॥
अनेन मन्त्रयोगेन, महापापकलङ्किताः ।
10 शुद्ध्यन्ति जन्तवः क्रूरास्त्यजन्ति क्रूरतां परे ॥ ८१ ॥
सप्तव्यसनसंसक्ता, अञ्जनाद्याश्च तस्कराः ।
प्राप्य मित्रमिमं मृत्यौ, तत्पुण्येन दिवं गताः ॥ ८२ ॥
जिनशासनमध्येऽयं, सारो मन्त्राधिपो महान् ।
उद्धारः सर्वपूर्वाणां, तत्त्वानां तत्त्वमुत्तमम् ॥ ८३ ॥
15 किमत्र बहुभिः प्रोक्तैर्मन्त्रराजप्रसादतः ।
ध्यानिनां जायते मुक्तिः, का वार्ता परवस्तुषु ॥ ८४ ॥

आ सन्मत्रनो जाप करवाथी, खरेखर ग्रहो, व्यंतरो, शाकिनीओ वगेरे अने दुष्ट देवताओ उपद्रव करवाने शक्तिमान थता नथी ॥ ७७ ॥

आ मत्रनी महाशक्तिथी मत पुरुषोने सर्पो, वाघो अने हाथीओ वगेरे, तेमज अनेक प्रकारना 20 उपसर्गो जाणे कीलित कर्या होय एवा बनी जाय छे ॥ ७८ ॥

मनुष्योना दुःसाध्य एवा कोढ, शूल वगेरे सर्व अशुभ रोगो आ मंत्रना ध्यानरूप औषधथी तरतमां क्षय पामी जाय छे ॥ ७९ ॥

समग्र प्रकारना अग्निओ आ मत्रना जापरूप पाणीथी सिंचाता शमी जाय छे अने जल तेम ज स्थलना सघळा भयो आ मत्रनी शक्तिथी नाश पामे छे ॥ ८० ॥

25 महापापथी कलंकित थयेला प्राणीओ आ मत्रनो योग थवाथी शुद्ध एटले पवित्र बनी जाय छे अने क्रूर प्राणीओ पण तेमनुं घातकीपणु छोडी दे छे ॥ ८१ ॥

साते व्यसनमा डूबेला एवा अंजन वगेरे चोरोए पण मृत्युकाले आ मंत्ररूप मित्रने पामीने तेना पुण्यथी ज स्वर्गने प्राप्त कर्यु ॥ ८२ ॥

जिनशासनमा आ (मंत्र) सारभूत महान् मत्रराज छे; समस्त पूर्वोना उद्धार स्वरूप छे अने 30 तत्त्वोमां उत्तम तत्त्व छे ॥ ८३ ॥

अहीं बहु कहेवाथी शु ? (वस्तुतः) आ मंत्रराजनी कृपाथी ध्यानी पुरुषोने मुक्ति आवी मळे छे त्यारे बीजी वस्तुओ मळे एमां आश्चर्य ज शुं छे ? ॥ ८४ ॥

विज्ञायेति सुखे दुःखे, पथि दुर्गे रणे स्थितौ ।
आसने शयने स्थाने, रोगक्लेशादिके सति ॥ ८५ ॥
सर्वावस्थासु सर्वत्र, महामन्त्रः शिवार्थिभिः ।
जपनीयोऽथवा ध्येयो, न मोक्तव्यो क्वचिद्धृदः ॥ ८६ ॥
वाचो वा विश्वकार्याणां, सिद्धयेऽत्र परत्र च ।	5
तथासंख्या विधेयास्य, सहस्र-लक्ष-कोटिभिः ॥ ८७ ॥
"णमो अरहंताणं, णमो सिद्धाणं, णमो आइ(य)रियाणं,
णमो उवज्झायाणं, णमो लोए सव्वसाहूणं ॥"
पञ्चसद्गुरुनामोत्थां षोडशाक्षरभूषिताम् ।
महाविद्यां जगद्विद्यां, स्मर सर्वार्थसिद्धिदाम् ॥ ८८ ॥	10
अस्याः शतद्वयं ध्यानी, जपेत् तल्लीनमानसः ।
अनिच्छन्नप्यवाप्नोत्युपवासपरं फलम् ॥ ८९ ॥
" अर्हत्-सिद्धाचार्योपाध्यायसर्वसाधुभ्यो नमः ॥"

ए प्रमाणे जाणीने सुखमा, दुःखमा, मार्गमा, पर्वतमा, युद्धस्थानमा, बेसवामा, शयनस्थानमा अने रोग तेमज कलह आवी पडे त्यारे—सघळी अवस्थामा अने सघळे स्थळे मोक्षना अर्थीओए आ महामत्रनो 15 जाप करवो; अथवा आ (मत्र)नु ध्यान करवु पण कदापि हृदयमाथी तेने दूर न करवो ॥ ८५-८६ ॥

आ लोक अने परलोकमा समस्त कार्यो अने वाणीनी सिद्धि माटे आ मत्रनो हजार, लाख अने करोड संख्या प्रमाणनो जाप करवो ॥ ८७ ॥

ते मत्र आ प्रकारे छे.—

"**णमो अरहंताणं, णमो सिद्धाणं, णमो आइ(य)रियाणं, णमो उवज्झायाणं, णमो** 20
लोए सव्वसाहूणं ॥"

पाच सद्गुरुओना नामथी निष्पन्न थयेल जे सोळ अक्षरोथी शोभती 'महाविद्या' छे, ते सघळा अर्थनी सिद्धि आपनारी जगत्-विद्या छे, तेनु तु स्मरण कर ॥ ८८ ॥

आ (विद्या)मा एकाग्र मनवाळो ध्यानी पुरुष बसो वार आ विद्यानो जाप करे तो न इच्छवा छताये उपवासनु सुदर फळ मेळवे छे[२] ॥ ८९ ॥	25

ते विद्या आ प्रकारे छे :—

"**अर्हत्-सिद्धाचार्योपाध्यायसर्वसाधुभ्यो नमः ॥**"

---

१. ज्ञा. श्लो. ४८ । २. ज्ञा. श्लो. ४९ ।

विद्यां षड्वर्णसंयुक्तामर्हत्-सिद्धसुनामजाम् ।
तत्त्वभूतां जगत्सारां, जपन्तु ध्यानिनोऽनिशम् ॥ ९० ॥
ये जपन्ति त्रिशुद्ध्येमां, विद्यां त्रिशतसम्मिताम् ।
संवरेण समं तेषां, चतुर्थतपसः फलम् ॥ ९१ ॥
5 "अरहंत–सिद्ध ॥"
चतुर्वर्णमयं मन्त्रं, चतुर्वर्गैकसाधनम् ।
अर्हन्नामभवं विश्वज्येष्ठं जपन्तु धीधनाः ॥ ९२ ॥ (अरिहंत)
आदिमं चार्हतो नाम्नोऽकारं पञ्चशतप्रमम् ।
वरं जपेत् त्रिशुद्ध्या यः, स चतुर्थफलं श्रयेत् ॥ ९३ ॥
10 एतत् स्वल्पं फलं प्रोक्तं, शास्त्रे रुच्याप्तये सताम् ।
किन्त्वमीषां फलं सम्यक्, संवरो निर्जरा शिवम् ॥ ९४ ॥
पञ्चसद्गुरुनामाद्यक्षरोद्भूतां जगन्नुताम् ।
पञ्चवर्णमयीं सारां, महाविद्यां समुद्धृताम् ॥ ९५ ॥
बीजबुद्ध्या श्रुतस्कन्धाम्बुधेर्ध्यायन्तु सद्बुधाः ।
15 ह्रॉंकारादिमहापञ्चतत्त्वोंकारोपलक्षिताम् ॥ ९६ ॥

अरिहत अने सिद्धनां सुंदर नामोमांथी उत्पन्न थयेली छ वर्णोवाळी विद्या तत्त्वभूत छे अने जगतमां सारभूत छे—तेनो ध्यानी पुरुषो सदा जाप करो ॥ ९० ॥

जे पुरुषो मन, वचन अने कायानी शुद्धिथी आ विद्यानो त्रणसो वार जाप करे छे, तेमने संवर थाय छे एटले आवता कर्मो रोकाय छे अने साथे साथे उपवासतपनुं फळ मळे छे[1] ॥ ९१ ॥

20 ते विद्या आ प्रकारे छे—"**अरहंत-सिद्ध ॥**"

विश्वमां महान् एवो अर्हन् नाममांथी उत्पन्न थयेलो चार वर्णमय (अ रि हं त) मंत्र चार वर्ग (धर्म, अर्थ, काम अने मोक्ष) ने साधनारो छे, तेनो बुद्धिशाळी पुरुषो जाप करे[2] ॥ ९२ ॥

अर्हंत नामना आदि अकारनो (अरिहंत) मन, वचन अने कायानी शुद्धि वडे जे साधक पांचसो वार जाप करे छे ते एक उपवासनुं फळ मेळवे छे[3] ॥ ९३ ॥

25 सज्जन पुरुषोने रुचि उत्पन्न करवा माटे शास्त्रमा दर्शावेलु आ स्वल्प फळ छे; परन्तु आ मंत्रोनु वास्तविक फळ तो संवर, निर्जरा अने मोक्ष छे[4] ॥ ९४ ॥

जगते जेने नमस्कार कर्यो छे एवी, पांच सद्गुरुओना नामना प्रथम अक्षरोमांथी निष्पन्न थयेली अने सारभूत एवी (अ सि आ उ सा) पाच वर्णमयी महाविद्या, जेनो श्रुतस्कन्धरूप समुद्रमांथी बीज-बुद्धि लब्धिथी उद्धार करायेलो छे, तेनो विद्वान् पुरुषो जाप करो। ते विद्या ह्रॉंकार वगेरे (ह्राँ ह्रीँ ह्रूँ ह्रौँ ह्रः) पांच महातत्त्वो 30 अने ॐकारथी उपलक्षित छे[5] ॥ ९५-९६ ॥

---

१. शा. श्लो. ५०। २. शा. श्लो. ५१। ३. शा. श्लो. ५३। ४. शा. श्लो. ५४। ५. शा. श्लो. ५५।

अनन्यशरणीभूय जपेद् यस्त्रिजगद्गुरुम् ।
इमां चतुःशतान्तं स, चतुर्थस्य फलं भजेत् ॥ ९७ ॥
अनया विद्यया पुंसां, जन्म-मृत्यु-ज[रा] द्रुतम् ।
हीयन्ते कर्मभिः सार्धं, ढौकन्ते शिवसम्पदः ॥ ९८ ॥
"ॐ ह्राँ ह्रीँ ह्रूँ ह्रौँ ह्रः अ सि आ उ सा नमः ॥" 5
अर्हत्-सिद्ध-त्रिधासाधुधर्मान् केवलिभाषितान् ।
विश्वमाङ्गल्यकर्तृंश्च, विश्वलोकोत्तमान् परान् ॥ ९९ ॥
विश्वशरण्यभूतांश्च, ध्यायन्तु तत्पदार्थिनः ।
चतुरोऽत्र चतुर्मङ्गलाद्यैः पदैः परैः सदा ॥ १०० ॥
लोकोत्तमपदाः पूज्याः, शरण्याश्चार्हदादिकाः । 10
एतद्ध्यानवतां ध्यानान्मङ्गलानि पदे पदे ॥ १०१ ॥
संपद्यन्तेऽत्र वाऽमुत्र, सम्पदस्त्रिजगद्भवाः ।
धर्मार्थकाम-मोक्षार्थाः, प्रणश्यन्त्यापदोऽखिलाः ॥ १०२ ॥
" चत्तारि मंगलं । अरिहंता मंगलं । सिद्धा मंगलं ।
साहू मंगलं । केवलिपण्णत्तो धम्मो मंगलं । 15

जे मनुष्य त्रण जगतना गुरु श्रीअर्हंतना अनन्य शरणे जई ए विद्यानो चार सो वार जाप करे छे ते उपवासनु फळ मेळवे छे ॥ ९७ ॥

आ विद्याथी मनुष्यना कर्मोनी साथे ज जन्म, मृत्यु अने जरा (वृद्धावस्था) जलदीथी घटे छे अने ते शिवसंपत्तिने प्राप्त करे छे ॥ ९८ ॥

ते विद्या आ प्रकारे छे :— 20

["ॐ ह्राँ ह्रीँ ह्रूँ ह्रौँ ह्रः अ सि आ उ सा नमः ॥"

विश्वनु मगल करनार, जगतना लोकोमा सर्वोत्तम अने जगतने शरण्यभूत एवा अरिहत, सिद्ध त्रण प्रकारे (?) साधु अने केवली भगवतोए उपदेशेल धर्म—ए चारेनु 'चत्तारि मगल' आदि उत्तम पदोथी ते पदवीना अर्थी मनुष्यो हमेशा ध्यान करो ॥ ९९-१०० ॥

"ते (उपर्युक्त) अरिहत वगेरे लोकोमां उत्तम पदवाळा छे, पूज्य छे अने शरण्यभूत छे," आ प्रकारे 25 ध्यान करनाराओने तेमना ध्यानना प्रभावथी पगले पगले मगल प्रगट छे । त्रण जगतमां रहेली संपत्तिओ अने धर्म, अर्थ, काम अने मोक्षरूप पुरुषार्थो आलोक अने परलोकमां प्राप्त थाय छे, तथा सर्व आपत्तिओ नाश पामे छे[1] ॥ १०१-१०२ ॥

ते मंत्र आ प्रकारे छे :—

"चत्तारि मंगलं। अरिहंता मंगलं। सिद्धा मंगलं। साहू मंगलं। केवलिपण्णत्तो धम्मो मंगलं।" 30

१. ज्ञा. श्लो. ५७ ।

"चत्तारि लोगुत्तमा। अरिहंता लोगुत्तमा। सिद्धा लोगुत्तमा।
साहू लोगुत्तमा। केवलिपण्णत्तो धम्मो लोगुत्तमो।
"चत्तारि सरणं पवज्जामि। अरिहंते सरणं पवज्जामि। सिद्धे सरणं पवज्जामि।
साहू सरणं पवज्जामि। केवलिपण्णत्तं धम्मं सरणं पवज्जामि॥"

5 मुक्तेः सौधं द्रुतारोढुमिमां सोपानमालिकाम्।
अर्हत्-सिद्ध-सयोगिश्रीकेवल्यक्षरसंभवाम्॥ १०३॥

आद्योंकारमयीं सारां, विद्यां ध्यायन्तु योगिनः।
त्रयोदश (पंचदश) सुवर्णाढ्यां, गुणस्थानगुणाप्तये॥ १०४॥

"ॐ अरिहंत सिद्ध सयोगिकेवली स्वाहा॥"

10 ॐकारभूषितं मन्त्रं ह्रींकाराङ्कितमुत्तमम्।
अर्हन्नामोभवं दक्षाश्चिन्तयन्तु शिवाप्तये॥ १०५॥
सकलज्ञानसाम्राज्यदानदक्षं च्युतोपमम्।
समस्तमन्त्ररत्नानां, चूडारत्नं सुखावहम्॥ १०६॥

"ॐ ह्रीँ अर्हँ नमः॥"

---

15 चत्तारि लोगुत्तमा। अरिहंता लोगुत्तमा। सिद्धा लोगुत्तमा। साहू लोगुत्तमा। केवलिपण्णत्तो धम्मो लोगुत्तमो।

चत्तारि सरणं पवज्जामि। अरिहंते सरणं पवज्जामि। सिद्धे सरणं पवज्जामि। साहू सरणं पवज्जामि। केवलिपण्णत्तं धम्मं सरणं पवज्जामि॥"

अरिहंत, सिद्ध अने सयोगी केवलीना अक्षरोथी उत्पन्न थयेली, मुक्तिरूपी महेलनु जलदीथी 20 आरोहण करवा माटे पगथियानी श्रेणि समान, पदर सुदर वर्णोथी शोभती अने जेनी आदिमा ॐकार छे तेवी सारभूत विद्यानु योगिओ गुणस्थानकनी प्राप्ति माटे ध्यान करो[1]॥ १०३-१०४॥

ते विद्या आ प्रकारे छेः—"ॐ अरिहंत सिद्ध सयोगिकेवली स्वाहा॥"

ॐकारथी भूषित अने ह्रीँकारथी अंकित तेमज 'अर्हन्' नाममांथी उत्पन्न थयेला उत्तम एवा मंत्रने चतुर पुरुषो मोक्षनी प्राप्ति माटे ध्यान करो॥ १०५॥

25 ए मंत्र सघळा ज्ञाननुं साम्राज्य आपवामां कुशळ, निरुपम, सुख लावनार अने समस्त मंत्ररत्नोमां चूडामणि (श्रेष्ठ) छे[2]॥ १०६॥

ते मंत्र आ प्रकारे छेः—"ॐ ह्रीँ अर्हँ नमः॥"

---

१. ज्ञा. श्लो. ५८। २. ज्ञा. श्लो. ६०।

कृत्स्नकर्मकलङ्कौघतमोविध्वंसभास्करम् ।
परं सिद्धनमस्कारजातं साक्षाच्छिवप्रदम् ॥ १०७ ॥
पञ्चवर्णमयं मन्त्रं विश्वविघ्नौघनाशनम् ।
दक्षाः स्मरन्तु मोक्षाय, जपन्तु वा निरन्तरम् ॥ १०८ ॥
"णमो सिद्धाणं ॥" 5
निर्दोषस्यार्हतो घातिघातिनः परमेष्ठिनः ।
प्राप्तानन्तगुणस्य श्रीमतः परमयोगिनः ॥ १०९ ॥
विदो जपन्तु मन्त्रेशं, विश्वक्लेशाग्निवार्मुचम् ।
भुक्ति-मुक्तिसुदातारं, त्रातारं भव्यदेहिनाम् ॥ ११० ॥
अनेन मन्त्रपुण्येन, त्रिजगन्नाथसंपदः । 10
विश्वशर्माणि लभ्यन्ते, क्रमाच्छ्रीजिनभूतयः ॥ १११ ॥
"ॐ नमोऽर्हते केवलिने परमयोगिने अनन्तविशुद्धपरिणामविस्फुरच्छुक्लध्यानाग्नि-निर्दग्धकर्मबीजाय प्राप्तानन्तचतुष्टयाय सौम्याय शान्ताय मङ्गलवरदाय अष्टादशदोषरहिताय स्वाहा ॥"

सर्व कर्म-कलंकना समूहरूप अंधकारनो नाश करवामां सूर्य समान, श्रेष्ठ, सिद्ध-नमस्कारथी 15 उत्पन्न थयेल, साक्षात् शिवने आपनार अने सर्व विघ्नसमूहना नाशक एवा पांच वर्णवाळा मंत्रनुं चतुर पुरुषो मोक्षनी प्राप्ति माटे सदा स्मरण करो अथवा तेनो जाप करो ॥ १०७-१०८ ॥

ते मंत्र आ प्रकारे छे :—"णमो सिद्धाणं ॥"

घाती (चार कर्मो)नो नाश करनारा, निर्दोष, अनंत गुण(चतुष्टय)ने प्राप्त, (केवलज्ञानरूप) लक्ष्मीथी शोभता अने परमयोगी एवा श्री अरिहंत परमेष्ठिना मंत्रराजने सुज्ञ पुरुषो जपे। ए मंत्रराज 20 समग्रक्लेशरूप अग्निने (शांत करवा) माटे मेघ समान, भुक्ति तेमज मुक्तिने आपनार अने भव्य जीवोनुं रक्षण करनार छे ॥ १०९-११० ॥

आ पवित्र मंत्र वडे त्रण जगतना नाथ श्री तीर्थंकर परमात्मानी संपत्तिओ अने सर्व सुखो क्रमशः प्राप्त थाय छे[२] ॥ १११ ॥

ते मंत्र आ प्रकारे छे :—"ॐ नमोऽर्हते केवलिने परमयोगिने अनन्तविशुद्धपरिणाम- 25 विस्फुरच्छुक्लध्यानाग्निनिर्दग्धकर्मबीजाय प्राप्तानन्तचतुष्टयाय सौम्याय शान्ताय मङ्गलवरदाय अष्टादशदोषरहिताय स्वाहा ॥"

१. श्रा. श्लो. ६२ । २. श्रा. श्लो. ६३ ।

पूर्णेन्दुमण्डलाकारं, पुण्डरीकं मुखे स्मरन् ।
क्रमात् तदष्टपत्रेषु, वर्णांश्चाष्टौ पृथक् पृथक् ॥ ११२ ॥
ॐकारार्हन्नमस्कारजातांस्तत्कर्णिकोपरि ।
ज्योतिर्मयमिवात्यन्तदीप्रं ह्रीँकारमूर्जितम् ॥ ११३ ॥
5 व्रजन्तं तालुरन्ध्रेण, तिष्ठन्तं भ्रूलतान्तरे ।
स्फुरन्तं चिन्तयाऽत्यर्थं, स्रवन्तममृताम्बुभिः ॥ ११४ ॥
अनेन मन्त्रपोतेन, सर्वविद्यागमाम्बुधेः ।
भवव्यसनपापाब्धेः प्राप्यते पारमुत्तमैः ॥ ११५ ॥
"ॐ **नमो अरहंताणं** ॥" इमेऽष्टौ वर्णाः । "**ह्रीँ** ॥"
10 इमां विद्यां महादेवीं, ललाटे संस्थितां स्मृताम् ।
कल्याणकारिणीं पूतां, क्ष्वीँकारजां शिवप्रदाम् ॥ ११६ ॥ "क्ष्वीँ ॥"
यदि साक्षात् त्वमुद्विग्नो, भवदुःखाग्नितापतः ।
तदा सप्ताक्षरं मन्त्रं, अर्हन्नामोद्भवं स्मर ॥ ११७ ॥
अनेनानादिमन्त्रेण, लभन्ते दृग्विभूषिताः ।
15 सर्वज्ञवैभवं विश्व-विजयं तद्गुणान् शिवम् ॥ ११८ ॥
"णमो अरहंताणं ॥"

पूर्णचंद्रमंडलाकार अष्टदल कमळनुं मुखमा स्मरण करवु । तेना आठ पत्रो पर क्रमशः 'ॐ नमो अरहंताणं' ए आठ वर्णो पृथक् पृथक् चिंतववा। तेनी कर्णिकामां ज्योतिर्मय, अत्यंत देदीप्यमान अने प्रभावशाळी ह्रीँकारने चिंतववो। पछी ते ह्रीँकार मुखकमलमांथी तालुरंध्रमा जाय छे, त्यांथी पसार थईने भ्रूमध्यमा 20 स्थिर थईने प्रकाशे छे अने अमृतजलने स्रवे छे, एम चिंतववु[1] ॥ ११२-११४ ॥

उत्तम पुरुषो आ मंत्ररूप नौका वडे सर्व विद्याओ अने आगमो रूप समुद्रना तथा संसारना संकटो अने पापोरूप समुद्रना पारने पामे छे[2] ॥ ११५ ॥

ते मंत्र आ प्रकारे छे :—"ॐ **नमो अरहंताणं** ॥" ॥ ह्रीँ ॥

आ **क्ष्वीँ**कारविद्यारूप महादेवीनु ललाटमा स्मरण करवुं । ते क्ष्वीँकारमांथी निष्पन्न, कल्याण-25 कारिणी, पवित्र अने शिवप्रद छे[3] ॥ ११६ ॥

ते विद्या आ प्रकारे छे— "**क्ष्वीँ** ॥"

जो तुं खरेखर संसारमां दुःखरूपी अग्निना तापथी उद्विग्न थयो होय तो अर्हन् नाममांथी उत्पन्न थयेल सप्ताक्षर मंत्रनुं स्मरण कर ॥ ११७ ॥

आ अनादिमंत्र वडे सम्यग्दृष्टि महात्माओ सर्व पर विजय, सर्वज्ञनो वैभव, ते(सर्वज्ञ)ना गुणो 30 अने शिवने प्राप्त करे छे ॥ ११८ ॥

ते मंत्र आ प्रकारे छे:—"**णमो अरहंताणं** ॥"

१. ज्ञा. श्लो. ६४। २. ज्ञा. श्लो. ७१। ३. ज्ञा. श्लो. ८१।

प्रणवानाहतोद्भूतं, वर्णत्रयमयं परम् ।
नासाग्रे ध्यानिनो मन्त्रं, ध्यायन्तु शिवशर्मणे ॥ ११९ ॥
एतेनाऽद्भुतमन्त्रेण, ध्यानशुद्धिः परा भवेत् ।
आत्यन्तिकसुखं स्वात्मजं च सिद्धगुणाष्टकम् ॥ १२० ॥
"ॐ अर्हं ॥" 5
ततो ध्यायेन्महाबीजं स्त्री (स्त्रीँ श्रीँ) कारं स्वमुखोदरे ।
विस्फुरन्तं जिनेन्द्रोक्तं, परं मन्त्रमयं शुभम् ॥ १२१ ॥ "स्त्रीँ" ॥ (श्रीँ ॥)
विद्यां स्वेष्टार्थसंदानकरां कल्पलतोपमाम् ।
श्रीवीरवदनोद्भूतां, ध्यायन्त्वचिन्त्यविक्रमाम् ॥ १२२ ॥
इमां विद्यां जपेद् योऽत्र, ध्यानलीनो निरन्तरम् । 10
अणिमादिगुणान् लब्ध्वा, तरेच्छास्त्रार्णवं च सः ॥ १२३ ॥
अस्या निरन्तराभ्यासाद्, ध्यानी लभेत निश्चितम् ।
त्रिकालविषयं ज्ञानं, विश्वतत्त्वप्रदीपकम् ॥ १२४ ॥

प्रणव अने अनाहतथी उत्पन्न थयेल त्रण वर्णवाळा श्रेष्ठ मंत्रने मोक्षसुख माटे ध्यानी पुरुषो नासिकाना अग्रभाग पर दृष्टि × राखीने ध्यान करो ॥ ११९ ॥ 15

आ अद्‌भुत मंत्र वडे ध्याननी परम शुद्धि, स्वात्मामा आत्यंतिक सुख अने सिद्धना आठ गुणो प्राप्त थाय छे[१] ॥ १२० ॥

ते मंत्र आ प्रकारे छेः—"ॐ अर्हं ॥"

ते पछी पोताना मुखनी अंदर, जिनेश्वर भगवंते उपदेशेल, विशेष प्रकारे स्फुरायमान, श्रेष्ठ मंत्रमय अने शुभ एवा महाबीज स्त्रीँ (श्रीँ)कारनुं ध्यान करवुं जोईए[२] ॥ १२१ ॥ 20

पोताना इच्छित अर्थनुं दान करवामां कल्पलता समान, श्री वीर भगवंतना मुखमांथी निकळेली अने अचिन्त्य सामर्थ्यवाळी आ विद्यानुं तमे ध्यान करो[३]। जे मनुष्य आ विद्यानो अहीं सदा ध्यानमग्न बनीने जाप करे छे, ते अणिमा वगेरे गुणो प्राप्त करे अने शास्त्ररूप समुद्रनो पार पामे[४]। आ विद्याना निरंतर अभ्यासथी ध्यानी पुरुष निश्चयथी सघळां तत्त्वोने प्रकाशित करवा माटे दीपक समान एवुं त्रणे काळना विषयनु ज्ञान प्राप्त करे छे[५] ॥ १२२-१२४ ॥ 25

× सरखावो : "द्वादशाङ्गुलपर्यन्ते नासाग्रे विमलेऽम्बरे ।
संविद्दृशोः प्रशाम्यन्त्योः प्राणस्पन्दो निरुध्यते ॥"
—हठयोगप्रदीपिका पृ. १९० ॥

नासाया नासिकाया अग्रेऽग्रगे भागे नासिकाया द्वादशाङ्गुलपर्यन्ते वा दत्ते प्रहिते ईक्षणे येन सः नासाग्रदत्तेक्षणः॥

१. शा. श्लो. ८७। २. शा. श्लो. ९०। ३. शा. श्लो. ९१। ४. शा. श्लो. ९२। ५. शा. श्लो. ९३। 30

"ॐ जोगे मग्गे तच्चे भूये भवे भविस्से अक्खे जिनपार्श्वे स्वाहा ॥
ॐ ह्रीँ अर्हँ नमो अरिहंताणं ह्रीँ नमः ॥"
दिक्पत्राष्टकसंपूर्णे, कमले मध्यसंस्थितम् ।
ध्यायेदात्मानमत्यन्तं, स्फुरद्ग्रीष्मार्कभास्करम् ॥ १२५ ॥

5 ॐकारार्हन्नमस्कारांश्चाष्टौ वर्णान् विचिन्तयेत् ।
क्रमात् पूर्वादिपत्रेषु, वर्णैकैकं प्रदक्षिणम् ॥ १२६ ॥

स्वीकृत्य पूर्वदिक्पत्रं, पूर्वदिक्सम्मुखस्थितः ।
जपेदष्टाक्षरं मन्त्रं, एकादशशतप्रमम् ॥ १२७ ॥

प्रत्यहं प्रतिपत्रेषु, पूर्वादिदिक्ष्वनुक्रमात् ।
10 अष्टरात्रं स्मरेद् ध्यानी, तं मन्त्रं निर्मलाशयम् ॥ १२८ ॥

अस्याचिन्त्यप्रभावेन, शाम्यन्ति क्रूरजन्तवः ।
सिंहसर्पादयः सर्वे, हरित्रस्ता गजा इव ॥ १२९ ॥
"ॐ नमो अरिहंताणं ॥"

ते विद्या आ प्रकारे छे—"ॐ जोगे मग्गे तच्चे भूये भवे भविस्से अक्खे जिनपार्श्वे स्वाहा ॥
15 ॐ ह्रीँ अर्हँ नमो अरिहंताणं ह्रीँ नमः ॥"

(आठ) दिशाओना आठ पत्रोथी परिपूर्ण एवा कमलना मध्यभागमां ग्रीष्म ऋतुना अत्यंत स्फुरायमान सूर्य जेवा आत्मानुं ध्यान करवुं । ते (पद्म) नां पूर्व आदि दिशाना पत्रोमां, ॐकारपूर्वक अर्हन् नमस्कार (ॐ नमो अरिहंताण)ना आठ वर्णोमांना प्रत्येक वर्णनु क्रमशः प्रदक्षिणामा चिंतन करवुं[2] । पूर्व दिशामां मुख करीने बेसवुं । पूर्व दिशाना पत्रमां आठ अक्षरना मंत्रनो अगियारसो संख्या प्रमाण
20 जाप करवो[3] । ध्यानी पुरुषे पूर्व आदि दिशाना प्रत्येक पत्रमां अनुक्रमे एक एक दिवस एम आठ रात्रि सुधी ते निर्मल आशय(अर्थ)वाळा मंत्रनु ध्यान करवुं जोईए[4] । आ (मंत्र)ना अचिन्त्य प्रभावथी, जेम सिंहथी हाथीओ भयभीत बने छे तेम सिंह, सर्प वगेरे सघळा क्रूर प्राणीओ शान्त बने छे[5] ॥ १२५-१२९ ॥

ते मंत्र आ प्रकारे छे—"ॐ नमो अरिहंताणं ॥"

---

25 १. शा. श्लो. ९५ । २. शा. श्लो. ९६ । ३. शा. श्लो. ९७ ।
४. शा. श्लो. ९८ । ५. शा. श्लो. ९९ ।

इत्येतद् ध्यानमाधाय, पूर्वं विघ्नौघशान्तये ।
पश्चात् सप्ताक्षरं मन्त्रं, जपेदोँकारवर्जितम् ॥ १३० ॥
मन्त्र ॐकारपूर्वोऽयं, विश्वाभीष्टार्थसिद्धिदः ।
एकोह्यनेककार्यार्थं, मुक्त्यर्थं प्रणवोज्झितम् ॥ १३१ ॥
"णमो अरिहंताणं ॥" 5
चतुर्विंशतितीर्थेशनमस्कारोद्भवं परम् ।
स्मर मन्त्रं जिनेन्द्रादिपदद जन्मघातकम् ॥ १३२ ॥
"श्रीमद्वृषभादि-वर्धमानान्तेभ्यो नमः ॥"
सुनिष्कम्पं मनः कृत्वा, पापारातिनिकन्दिनीम् ।
जिनेन्द्रमुखजां विद्यां, महतीं पापभक्षिणीम् ॥ १३३ ॥ 10
विश्वविद्यासु (?) सिद्धान्तदानदक्षां जगन्नुताम् ।
ध्यायन्तु प्रत्यहं धीरा, अर्हन्मुखाब्जवासिनीम् ॥ १३४ ॥
मुनेरस्याः प्रभावेन, पापपङ्कः प्रलीयते ।
चेतः प्रशान्तिमायाति, विज्ञानं जायते परम् ॥ १३५ ॥

विघ्नोना समूहनी शान्ति माटे पहेलां आ रीतनु (उपर्युक्त मंत्रनुं) ध्यान करीने, ते पछी ॐकारथी 15 रहित एवा सात अक्षरना मंत्रनो जाप करवो[1] ॥ १३० ॥

सघळी इच्छित वस्तुओनी सिद्धिने आपनारो ॐकारपूर्वकनो आ एक ज मंत्र अनेक कार्यो माटे थाय छे। मुक्तिने माटे ॐकारथी रहित (एवा आ ज मंत्र) नुं ध्यान करवुं ॥ १३१ ॥

ते मत्र आ रीते छे[2] — "णमो अरिहंताणं ॥"

चोवीश तीर्थंकरोना नमस्कारथी उत्पन्न थयेल श्रेष्ठ मत्र, जे तीर्थंकर आदि पदवीने आपनारो छे 20 अने जन्मनो नाश करनारो छे, तेनुं तुं स्मरण कर[3] ॥ १३२ ॥

ते मंत्र आ प्रकारे छे—"श्रीमद्वृषभादि-वर्धमानान्तेभ्यो नमः ॥"

मनने सारी रीते निश्चळ बनावीने पापरूपी शत्रुनां मूळने ऊखेडी नाखनारी अने श्रीजिनेन्द्रना मुखथी नीकळेली आ महान पापभक्षिणी महाविद्या छे[4]। ते सिद्धान्तनुं दान करवामां प्रवीण, जगतना मनुष्यो वडे नमस्कृत अने अरिहंत भगवंतना मुखरूपी कमळमां रहेनारी छे। तेनुं, हे धीर मनुष्यो ! तमे 25 सदा ध्यान करो ॥ १३३-१३४ ॥

आ(विद्या)ना प्रभावथी मुनिनो पापरूप मळ नाश पामे छे; तेनुं चित्त शांत बने छे अने तेने श्रेष्ठ एवुं विज्ञान प्राप्त थाय छे ॥ १३५ ॥

१. ज्ञा. श्लो. १०१ । २. ज्ञा. श्लो. १०२ । ३. ज्ञा. श्लो. १०३ । ४. ज्ञा. श्लो. १०४ ।

"ॐ अर्हन्मुखकमलवासिनि! पापात्मक्षयङ्करि! श्रुतज्वालासहस्रप्रज्वलिते! सरस्वति! मत्पापं हन हन दह दह क्षाँ क्षी क्षूँ क्षौँ क्षः क्षीरवरधवले! अमृतसंभवे! पापभक्षिणि! वँ वँ हूँ हूँ स्वाहा ॥"

संजयन्तादियोगीन्द्रैः सिद्धचक्रमनेकधा।
5 भुक्ति-मुक्तेर्निधानं यद्, विद्यावादात् समुद्धृतम् ॥ १३६ ॥
तद्ध्यान्तु बुधा मुक्त्यै, सर्वविघ्नादिनाशनम्।
तस्य प्रयोजकं शास्त्रं, ज्ञात्वा गुरूपदेशतः ॥ १३७ ॥ "सिद्धचक्रम्" ॥
स्मर मन्त्रपदाधीशमर्हन्नामाक्षराभिधम्।
'अ'वर्णं नाभिपद्मे त्वं, मोक्षमार्गप्रदीपकम् ॥ १३८ ॥
10 'सि'वर्णं मस्तकाम्भोजे, 'सा'कारं च मुखाम्बुजे।
'आ'कारं कण्ठकञ्जे हि, 'चो+'कारं हृत्सरोरुहे ॥ १३९ ॥
एष मन्त्रमहाराजोऽर्हदाद्यक्षरोद्भवः।
पञ्चवर्णमयोऽनेकाभीष्टदोऽनिष्टशान्तिकृत् ॥ १४० ॥
"अ सि आ उ सा ॥"

---

15 ते विद्या आ प्रकारे छे:—"ॐ अर्हन्मुखकमलवासिनि! पापात्मक्षयङ्करि! श्रुतज्वाला-सहस्रप्रज्वलिते! सरस्वति! मत्पापं हन हन दह दह क्षाँ क्षी क्षूँ क्षौँ क्षः क्षीरवरधवले! अमृतसंभवे! पापभक्षिणि! वँ वँ हूँ हूँ स्वाहा ॥"

संजयन्त आदि योगीन्द्रोए विद्याप्रवाद (पूर्व) मांथी भुक्ति अने मुक्तिना निधानरूप श्री सिद्धचक्रनो अनेक प्रकारे उद्धार कर्यो छे, ते सर्व विघ्नोनो नाश करनार छे तेथी तेना प्रयोजक शास्त्रनुं ज्ञान गुरु 20 उपदेशथी जाणीने हे बुद्धिमान पुरुषो! तमे मुक्तिने माटे तेनुं ध्यान करो ॥ १३६-१३७ ॥

मंत्रपदोना अधीश श्रीमद् अर्हन्‌ना नामना अक्षरोनो वाचक 'अ' वर्ण छे। ते मोक्षमार्गमां दीपक समान छे। तेनुं तुं नाभिपद्ममां स्मरण कर ॥ १३८ ॥

ए ज रीते मस्तक(ब्रह्मरन्ध्रना)कमलमां 'सि' वर्णनुं, मुखकमलमां 'सा' वर्णनुं, कंठपद्ममां 'आ' वर्णनुं अने हृदयकमलमां 'उ' वर्णनुं तुं ध्यान कर ॥ १३९ ॥

25 अरिहंत वगेरे नामना आदि अक्षरोथी उत्पन्न थयेल आ (मंत्र) मन्त्रोमां श्रेष्ठ छे। ते पंचवर्णमय छे। ते अनेक प्रकारनां इच्छितोने आपनार अने अनिष्ट वस्तुओने शान्त करनार छे ॥ १४० ॥

ते मंत्र आ प्रकारे छे—"अ सि आ उ सा ॥"

+ चो = च + 'उ'।
१. ज्ञा. श्लो. १०६-१०७। २. ज्ञा. श्लो. १०८।

साक्षात् सिद्धिपदं दातुं, क्षमं मन्त्रं स्मरान्वहम् ।
विश्वविघ्नहरं ज्येष्ठं, सर्वसिद्धनमः प्रजम् ॥ १४१ ॥
"नमः सर्वसिद्धेभ्यः ॥"
इत्यादीन्यपराण्यत्र, सारमन्त्रपदानि च ।
उद्धृतानि श्रुतस्कन्धाज्जगद्धिताय योगिभिः ॥ १४२ ॥　　5
यानि निर्वेदबीजानि, मनःशान्तिकराणि च ।
ध्येयानि तानि सर्वाणि, बुधैः पदस्थसिद्धये ॥ १४३ ॥
राग-द्वेषाक्षमोहाद्यरयो यान्ति क्षयं सताम् ।
साम्यं संवेगबोधादिगुणाः प्रादुर्भवन्ति च ॥ १४४ ॥
संवरो निर्जरा मोक्षो, मनोजयश्च जायते ।　　10
यैर्मन्त्रौघैः पदैः वर्णैः सारैर्दोषापहैः परैः ॥ १४५ ॥
ते सर्वे मुनिभिर्ध्येयाश्चिन्तनीया मुहुर्मुहुः ।
कथनीयाः परेषां च, भावनीया निरन्तरम् ॥ १४६ ॥
जपनीयाश्च सर्वत्र, निश्चेतव्या स्वमानसे ।
श्रद्धेयाः स्वात्मसिद्ध्यर्थं, किं वृथा बहुजल्पनैः ॥ १४७ ॥　　15

साक्षात् सिद्धिपद देवाने समर्थ एवा मंत्रनु हंमेशा तुं स्मरण कर; ते सर्व विघ्नोने हरनारो छे, ज्येष्ठ छे, अने 'सर्वसिद्ध-नमः' शब्दोथी निष्पन्न थयेलो[1] छे ॥ १४१ ॥

ते मत्र आ प्रकारे छे—"नमः सर्वसिद्धेभ्यः ॥"

आ प्रकारे अहीं आ अने बीजां पण जे साररूप मत्रपदो छे तेनो, योगीओए जगतना हितने माटे श्रुतस्कन्धमांथी उद्धार कर्यो छे[2] ॥ १४२ ॥　　20

जे निर्वेदनां जनक अने मननी शांति करनारा बीजो छे ते बधां बीजोनुं बुद्धिशाळी पुरुषोए पदस्थ ध्याननी सिद्धिने माटे ध्यान करवुं ॥ १४३ ॥

(ते मत्रबीजोना ध्यानथी) सत्पुरुषोना राग, द्वेष, इंद्रियो अने मोहरूप शत्रुओ क्षय पामे छे अने समभाव, संवेग, बोध आदि गुणो प्रगट थाय छे ॥ १४४ ॥

वळी जे दोषहर अने सारभूत पदो, वर्णो, के मंत्रसमूह वडे संवर, निर्जरा, मोक्ष अने मननो जय　25 थाय ते बधानुं मुनिओए वारंवार ध्यान अने चिंतन करवुं जोईए। ते बीजाने कहेवा (आपवा) जोईए अने तेनी निरंतर भावना करवी जोईए ॥ १४५-१४६ ॥

ते (मंत्रो)नो आत्मानी मुक्ति माटे सर्वत्र जाप करता रहेवुं जोईए; पोताना मनमां तेनो निश्चय करवो जोईए; अने तेना उपर श्रद्धा राखवी जोईए। निरर्थक, बहु कहेवाथी शुं ! ॥ १४७ ॥

१. शा. श्लो. १११ । २. शा. श्लो. ११५ ।　　30

एतत् पदस्थसद्ध्यानं, स्वाधीनं जपनादिभिः ।
सर्वत्र सुख-दुःखादिजातावस्थासु कोटिषु ॥ १४८ ॥
कुर्वन्तु ध्यानिनो धीरा, स्वप्नेपि मा त्यजन्तु भोः ।
शयनासनसद्वार्ताव्रजनादौ शिवाप्तये ॥ १४९ ॥
5 सन्मन्त्रजपनेनाहो, पापारिः क्षीयतेतराम् ।
मोहाक्षस्मरचौराद्यैः, कषायैः सह दुर्धरैः ॥ १५० ॥
मनः परीषहादीनां, जयः कर्मनिरोधनम् ।
निर्जरा कर्मणां मोक्षः, स्यात्सुखं स्वात्मजं सताम् ॥ १५१ ॥
वीतरागमुनीन्द्राणां, ध्यानसिद्धिश्च केवलम् ।
10 त्यक्तरागादिदोषाणां, जिनैः प्रोक्ता न संशयः ॥ १५२ ॥
मत्वेति रागद्वेषाद्यरीन् हत्वा जिताशयाः ।
कषायाक्षभटैः सार्धं, क्षमा-तोषादिकायुधाः ॥ १५३ ॥
नानाभेदं प्रकुर्वन्तु, पदस्थध्यानमूर्जितम् ।
सर्वयत्नेन सिद्ध्यर्थं, सर्वत्रालम्ब्य साम्यताम् ॥ १५४ ॥

15 ध्यानी एवा धीरपुरुषोए आ सुंदर पदस्थ ध्यानने सर्वत्र सुख-दुःख-जन्म-जरादि अनेक अवस्थाओमां जपादि वडे स्वाधीन (सुसाध्य) करवुं जोईए। तेनो स्वप्नमां पण त्याग न करवो। शयन-आसन-वार्तालाप-गमन वगेरेमां पण मोक्षप्राप्तिनुं ध्येय सामे राखीने ते (ध्यान) करवुं जोईए। सुंदर मंत्रना जापथी मोह, इन्द्रियो, कामरूप चोर वगेरे दुर्धर कषायो सहित पापशत्रु अत्यंत क्षीण थाय छे। तेथी सत्पुरुषोने मनोजय, परीषह-जय, कर्मनिरोध, कर्मनिर्जरा, मोक्ष अने स्वात्मामांथी उत्पन्न थतुं शाश्वत सुख प्राप्त 20 थाय छे॥ ॥ १४८-१५१ ॥

श्री जिनेश्वरोए कह्युं छे के "राग, द्वेष आदि दोषोथी रहित एवा वीतराग मुनिओने ज केवळ ध्यानसिद्धि थाय छे, एमां संशय नथी।" एम मानीने मनने जीतनारा साधकोए क्षमा, संतोष वगेरे शस्त्रो वडे कषायो अने इन्द्रियोरूप सुभटोने जीतीने, राग अने द्वेषरूप शत्रुओने हणीने अने सर्वत्र साम्यने धारण करीने सिद्धिने माटे सघळा प्रयत्नोथी समर्थ एवु विविध प्रकारनु पदस्थ ध्यान करवुं जोईए॥ १५२-१५४ ॥

25
परिचय

सोलापुरना श्री जीवराज जैन ग्रन्थालयमांथी 'तत्त्वार्थसारदीपक' नामनी एक हस्तलिखित प्रत मळी हती। प्रत घणी उपयोगी होई तेनी फोटोस्टेटिक नकल कढावीने श्री जैन साहित्य विकास मण्डलना पुस्तकालयमां राखवामां आवी छे। तेना पत्र ५५ थी ६५ एम अगियार पत्र परथी नमस्कार-विषयक संदर्भ तारवीने अहीं अनुवाद सहित संपादित करेल छे। प्रतमां जणाव्युं छे तेम तेना कर्ता 30 भट्टारक श्रीसकलकीर्ति छे। तेओ भट्टारक श्रीपद्मनन्दिनी शिष्यशाखामांना एक हता।

प्रस्तुत संदर्भमां 'पदस्थ ध्यान' विशे घणी उपयोगी समज प्राप्त थाय छे; जो के तेना पर श्री शुभचन्द्राचार्यकृत 'ज्ञानार्णव'नी घणी मोटी असर छे अने ते बन्नेना श्लोको सरखावतां तुरत समजाय छे।

उपासनादर्शक पञ्चपरमेष्ठि चित्रम्

[५६-११]

श्रीसिंहतिलकसूरिविरचित-श्रीमन्त्रराजरहस्यान्तर्गतार्हदादि-पञ्चपरमेष्ठिस्वरूपसंदर्भः ॥

अर्हददेहाचार्योपाध्याय-मुनीन्द्रपूर्ववर्णोत्थः । 5
प्रणवः सर्वत्रादौ, ज्ञेयः परमेष्ठिसंस्मृत्यै ॥ ३१४ ॥ १ ॥

अर्हत्-सिद्धाचार्योपाध्याय-मुनित्वरूपमर्हन्तः ।
पूज्योपचार-देशक-पाठक-निर्विषयचित्तत्वात् ॥ ३१५ ॥ २ ॥

× × ×

प्रणवः प्रागुक्तार्थो, मायावर्णेऽर्हदादिपञ्चकताम् ।
अन्तश्चतुरधिर्विंशतिजिनस्वरूपमथो वक्ष्ये ॥ ३४२ ॥ ३ ॥ 10

अनुवाद

(ॐकार--)

अरिहंन, अदेह (अशरीरी-सिद्ध), आचार्य, उपाध्याय अने मुनिना प्रथम वर्णोमांथी (अ+अ+आ+उ+म्=ॐ) निष्पन्न थयेलो प्रणव[1] पञ्चपरमेष्ठीना स्मरण अर्थे (मंगल रूपे) सर्वत्र प्रारंभमां आवे छे॥ ३१४ ॥ १ ॥ 15

अरिहतो अरिहंत-सिद्ध-आचार्य-उपाध्याय-साधु स्वरूप छे, कारण के तेमनामां पूज्यता होवाथी तेओ अरिहंत छे; उपचारथी (द्रव्यसिद्धत्व होवाथी) तेओ सिद्ध छे; उपदेशकता होवाथी तेओ आचार्य छे; पाठकता होवाथी तेओ उपाध्याय छे अने निर्विषय चित्त होवाथी तेओ साधुरूप छे ॥ ३१५ ॥ २ ॥

× × ×

(ह्रींकार -)

ऊपर प्रणवनो अर्थ कहेवामां आव्यो छे (एटले के ॐकार ते पंचपरमेष्ठीना प्रथम अक्षरो वडे 20 केवी रीते निष्पन्न थयो छे ए कहेवामां आव्युं छे)। हवे मायावर्ण-ह्रींकारना देहमां पचपरमेष्ठी अने चोवीश तीर्थंकरो केवी रीते छे ते समजावीश ॥ ३४२ ॥ ३ ॥

१. सरखावो— "अरिहंता असरीरा आयरिय उवज्झाय तहा मुणिणो।
पंचक्खरनिप्पन्नो ॐकारो पंचपरमिट्ठी ॥ १ ॥"

—न. स्वा. (प्रा. वि.) पृ. २६३. 25

अर्हन्तो वर्णान्तः रेफः सिद्धाः शिरश्च सूरिरिह ।
शुद्धकलोपाध्यायो दीर्घकला साधुरिति पञ्च ॥ ३४३ ॥ ४ ॥
अर्हन्तौ शशि-सुविधिजिनौ सिद्धाः(द्धौ) पद्माभ-वासुपूज्यजिनौ ।
न दुर्भगत्वं नोद्वेगः, साधूपास्तिकृतां नृणाम् ॥ १ ॥
न चतुर्द्धा दुःखतमो, नराणामान्ध्य-हेतवे ।
10 साधुध्यानाऽमृतरसाञ्जनलिप्तमनोदृशाम् ॥ २ ॥
मोक्कारः सर्वसङ्गानां, मोष्या नान्तर-वैरिणाम् ।
मोदन्ते मुनयः कामं, मोक्ष-लक्ष्मी-कटाक्षिताः ॥ ३ ॥
लोभ-द्रुम-नदीवेगाः, लोकोत्तर-चरित्रिणः ।
लोकोत्तमास्तृतीयास्ते, लोपं तन्वन्तु पाप्मनाम् ॥ ४ ॥

---

15 णं—अक्षर त्रण रेखावाळो अने माथे अनुस्वारवाळो छे, ए एम जणावे छे के विनय, श्रुत अने शीलादि गुणो महानन्द-मोक्ष प्राप्ति माटे जाग्रत छे ॥ ७ ॥

सात रज्जू प्रमाण ऊर्ध्वलोकना मार्गने प्रकाश करवामा दीपकनी जेम अत्यन्त उज्ज्वल आ चोथा 'नमो उवज्झायाण' पदना सात अक्षरो मारा सात व्यसनोनो नाश करो ॥ ८ ॥

पांचमो प्रकाश

20 नथी ते मनुष्योने व्याधि, नथी दरिद्रता, नथी इष्ट वस्तुओनो वियोग, नथी दौर्भाग्य अने नथी भय के त्रास, के जेओ साधुओनी उपासना-सेवा करनारा होय छे ॥ १ ॥

साधुपदना ध्यानरूपी अमृतरसना अजन वडे जेओनां मनरूपी नेत्रो अंजाया छे, ते मनुष्योने (चार गतिमां उत्पन्न थता?) चार प्रकारना दुःखरूपी अंधकार अंधपणानुं कारण थतो नथी ॥ २ ॥

मोक्कारः—सर्वसंगनो त्याग करनारा, राग-द्वेषादि आन्तर शत्रुओथी नहि लुंटानारा अने मोक्ष-
25 लक्ष्मी वडे कटाक्षपूर्वक जोवायेला मुनिओ अत्यन्त आनंद पामे छे ॥ ३ ॥

लोभरूपी वृक्षने उखेडी नांखवा माटे नदीना वेग जेवा, लोकोत्तर चरित्रवाळा अने लोकोत्तम (अरिहंत, सिद्ध, साधु अने धर्म) वस्तुओमां तृतीय एवा मुनि भगवंतो अमारा पापोनो नाश करो ॥ ४ ॥

एकान्ते रमते स्वैरं, मृगेण मनसा समम् ।
मूलोत्तरगुण-ग्रामाऽऽरामेषु भगवान् मुनिः ॥ ५ ॥

एकत्वं यदिदं साधौ, संविग्ने श्रुतपारगे ।
तत्साक्षाद् दक्षिणावर्त्ते, शङ्खे सिद्ध-सरिज्जलम् ॥ ६ ॥

एको न क्रोध-विधुरो, नैको मानं तनोति वा ।   5
एको न दम्भ-संरम्भी, तृष्णा मुष्णाति नैककम् ॥ ७ ॥

एकत्व-तत्त्व-निर्व्यूढ-सत्त्वा राजर्षि-कुञ्जराः ।
ययुः प्रत्येकबुद्धाः श्रीनमि-प्रभृतयः शिवम् ॥ ८ ॥

सर्वथा ज्ञात-तत्त्वानां, सदा संविग्न-चेतसाम् ।
सतामेकाकिता सम्यक्, समतामृत-सारणिः ॥ ९ ॥   10

ठ्ववेदैदंयुगीनौ तु, द्वौ द्वौ सङ्घाटक-स्थितौ ।
स्वार्थ-संसाधकौ स्यातां, व्रतिनौ वशिनौ यदि ॥ १० ॥

व्व-संज्ञयेत्यवतर्क्यमैतिह्यं यद् द्वयोर्द्वयोः ।
वचोवक्षोवपुर्वृत्त्या, वशिनोर्व्रतिनोः शिवम् ॥ ११ ॥

एकान्तमा मुनि भगवान् मूलोत्तर गुणना समूहरूप बगीचामा मनरूपी मृगनी साथे स्वेच्छापूर्वक क्रीडा करे छे ॥ ५ ॥   15

संविग्न अने श्रुतना पारगामी गीतार्थ साधुने विषे जे एकाकीपणु छे, ते साक्षात् दक्षिणावर्त्त शंखमा गंगा नदीना पाणी जेवु छे । संविग्न अने गीतार्थ एवो एकाकी साधु क्रोध वडे विह्वळ थतो नथी, मान करतो नथी, माया-कपट करतो नथी अने तृष्णा एने लूटती नथी ॥ ६-७ ॥

राजर्षिओमां श्रेष्ठ नमिराजर्षि वगेरे प्रत्येकबुद्धो एकत्व भावना वडे पोताना पराक्रमने खीलवीने मोक्षने पाम्या ॥ ८ ॥   20

सर्व प्रकारे जीवादि तत्त्वोने जाणनारा अने सदा वैराग्यवासित चित्तवाळा गीतार्थ साधुओनु एकाकीपणु श्रेष्ठ समतारूपी अमृतनी नीक जेवुं छे ॥ ९ ॥

व्व अक्षरनी जेम सङ्घाटक—बे बे साथे विचरनारा आ युगना साधुओ जो तेओ इन्द्रियो अने मनने वश करनारा होय तो ज स्वार्थने (स्वप्रयोजन मोक्षने) साधनारा थाय छे ॥ १० ॥   25

'व्व' संज्ञावडे ए गुरुपरंपरागत रहस्य अनुमित थाय छे के जितेंद्रिय एवा बे बे साधुओनु परस्परना मन, वचन अने कायाना शुभ योगो वडे कल्याण थाय छे, परस्परना शुभयोगो परस्परने सहायक बने छे ॥ ११ ॥

१. सारा रा. ग. हि. । २. समम् क. । ३. सर्वदैवयुगीनौ क. । ४. सर्वज्ञावित्यवितर्क्य० क.

निःशङ्कमैक्यं जनयोर्वशित्वादुभयोरपि ।
एकस्यापि सहस्रत्वं, दुरन्तमवशात्मनः ॥ १२ ॥

नेत्रवत्समसङ्कोच-विस्तार-स्वप्न-जागरौ ।
द्वौ दर्शनाय कल्पेते, नैकः सम्पूर्णकृत्यकृत् ॥ १३ ॥

5 एको विडम्बनापात्रं, एकः स्वार्थाय न क्षमः ।
एकस्य नहि विश्वासो, लोके लोकोत्तरेऽपि वा ॥ १४ ॥

भावना-ध्यान-निर्णीत-तत्त्व-लीनान्तरात्मनः ।
ऐक्यं न लक्ष-मध्येऽपि, निर्ममस्य विनश्यति ॥ १५ ॥

साम्यामृतोर्मि-तृप्तानां, सारासार-विवेचिनाम्[1] ।
10 साधूनां भावशुद्धानां[2], स्वार्थेऽपि क्वाऽथवा क्षतिः[3] ॥ १६ ॥

मनःस्थैर्यान्निश्चलानां, वृक्षादिवदकर्मणाम् ।
वृन्दमृषीणामेकत्र, भावना-वल्लि-मण्डपः ॥ १७ ॥

इन्द्रियो अने मनने वश राखनारा होय ते बे साधुओमा पण एकत्व निःशकपणे वधी शके छे, कारण के—बन्ने जितेन्द्रिय होवाथी एक ज विचारना होय छे, परन्तु इन्द्रियो अने मनने परवश बनेलो 15 एकपण होय तो पण ते दुःखदायक हजार जेवो छे ॥ १२ ॥

नेत्रनी जेम संकोच अने विस्तारमा तथा निद्रा अने जाग्रतिमा सरखे सरखी स्थितिवाळा बे साधुओ सम्यग दर्शनने माटे समर्थ बने छे, परतु एकलो साधु संपूर्णपणे कार्य करी शकतो नथी। कारण के—एकलो माणस विडम्बनानु स्थान बने छे, एकलो माणस स्वार्थसिद्धि माटे पण असमर्थ बने छे, अने एकला माणसनो लोकमां तथा लोकोत्तर जैन शासनमा पण कोई विश्वास करतु नथी ॥ १३-१४ ॥

20 भावना* तथा ध्यान+ द्वारा निर्णीत करेला तत्त्वमा लीन छे अन्तरात्मा जेनो एवा अने ममता विनाना साधुनुं एकाकीपणुं लाख माणसोनी अदर रहेवा छता पण नाश पामतु नथी ॥ १५ ॥

साम्य (समता) रूप अमृतनी ऊर्मिओथी तृप्त, सार अने असारनो विवेक करनारा अने निर्मल आशयवाळा साधुओ घणा होय तो पण तेमने पोतपोताना कार्यमां कोई पण जातनी हरकत आवती नथी ॥ १६ ॥

25 मननी स्थिरतावडे निश्चल अने वृक्ष आदिनी जेम अकर्म (अक्रिय, अनाश्रव) एवा साधुओना समूहनो एकत्रवास ए भावनारूपी लतानो मंडप छे ॥ १७ ॥

१. विवेकिनाम् हि० । २. सिद्धाना ख. ग. घ. हि. । ३. क्षितिः क. ।

* ज्यारे मन अध्यात्मवडे आत्मरमणतामा सविशेष पुष्ट थाय छे त्यारे ते भावना नामनो योग कहेवाय छे ।

+ ज्यारे चित्त शुभ विषयने ज अवलबीने स्थिर दीपकनी जेम प्रकाशमान थई सूक्ष्म बोधवाळुं बने छे त्यारे 30 ते ध्यान नामनो योग कहेवाय छे ।

मनसा कर्मणा वाचा, चित्रालिखित-सैन्यवत् ।
मुनीनां निर्विकाराणां, बहुत्वेऽप्यरतिः कुतः ? ॥ १८ ॥

निर्जीवेष्विव चैतन्यं, साहसं कातरेष्विव ।
बहुष्वपि मुनीन्द्रेषु, कलहो न मनागपि ॥ १९ ॥

पञ्चषैरपि यो ग्लानिं, मुग्धधीर्गणयिष्यति । 5
एकत्राऽनन्तसिद्धेभ्यः, स कथं स्पृहयिष्यति ? ॥ २० ॥

रागाद्यपाय-विषमे, सन्मार्गे चरतां सताम् ।
रत्नत्रयजुषामैक्यं, कुशलाय न जायते ॥ २१ ॥

नैकस्य सुकृतोल्लासो, नैकस्यार्थोऽपि तादृशः ।
नैकस्य कामसम्प्राप्तिर्नैको मोक्षाय कल्पते ॥ २२ ॥ 10

श्लेष्मणे शर्करादानं, सज्वरे स्निग्ध-भोजनम् ।
एकाकित्वमगीतार्थे, यतावश्नति नौचितीम् ॥ २३ ॥

एकश्चौरायते प्रायः, शङ्क्यते धूर्त्तवद् द्वयम् ।
त्रयो रक्षन्ति विश्वासं, वृन्दं नरवरायते ॥ २४ ॥

चित्रमा चित्रेला सैन्यनी जेम मन, वचन अने काया वडे विकार विनाना मुनिओ घणा होय तो 15
पण तेमने अरति क्यांथी होय ? ॥ १८ ॥

निर्जीव पदार्थोमां जेम चैतन्य न होय, कायरोमां जेम साहस न होय, तेम मुनिवरो घणा होय तो पण तेओमा अल्प पण कलह होतो नथी ॥ १९ ॥

जे मूढबुद्धि पांच छ साधुओनी साथे रहेवामा पण ग्लानि (खेद) पामे छे, ते एक ज स्थानमा रहेला अनंत सिद्धोनी साथे रहेवानी स्पृहा शी रीते करी शके ? ॥ २० ॥ 20

रत्नत्रय धारण करनार मुनिओने रागादि शत्रुओना अपायोथी विषम एवा सन्मार्गमा एकला चालवु ए कल्याणने माटे थतु नथी (विषम मार्गमां एकाकी जतां रत्नो लुटाई जवानो संभव छे) ॥ २१ ॥

एकलाने **धर्म**मा उल्लास थतो नथी, एकलाने **अर्थ** पण तेवो प्राप्त थतो नथी, एकलाने **काम**नी संप्राप्ति थती नथी अने एकलो **मोक्ष**—मार्गनी आराधना माटे समर्थ बनतो नथी (एकलाथी चार प्रकारना पुरुषार्थोनी साधना दुःशक्य छे) ॥ २२ ॥ 25

जेम कफना रोगमां साकर आपवी अने तावमा स्निग्ध भोजन आपवु उचित नथी, तेम अगीतार्थ साधुमां एकाकिता औचित्यने पामती नथी ॥ २३ ॥

एकलाने विषे प्रायः चोरनी कल्पना थाय छे, बे माणस साथे होय तो तेमना उपर 'ठग'नी शंका कराय छे, त्रण माणस साथे होय तो ते विश्वासनुं पात्र बने छे अने घणानो समुदाय होय तो ते राजानी जेम शोभे छे ॥ २४ ॥ 30

जिन-प्रत्येकबुद्धादि-दृष्टान्तान्नैकतां श्रयेत् ।
न चर्म-चक्षुषां युक्तं, स्पर्द्धितुं ज्ञानदृष्टिभिः ॥ २५ ॥

चातुर्गतिक-संसारे, भ्राम्यतां सर्वजन्मिनाम् ।
पुण्य-पाप-सहायत्वान्नैकत्वं घटतेऽथवा ॥ २६ ॥

5 संज्ञा-कुलेश्या-विकथाश्चर्चिका इव चापलम् ।
यस्याऽन्तर्धाम कुर्वन्ति, स एकाकी कथं भवेत् ? ॥ २७ ॥

शाकिनीवदविरति-संज्ञा नाट्यप्रिया सदा ।
ग्रासाय यतते यस्य, स एकाकी कथं भवेत् ? ॥ २८ ॥

पञ्चाग्निवदसन्तुष्टं, यस्येन्द्रियकुटुम्बकम् ।
10 देहं दहत्यसन्देहं, स एकाकी कथं भवेत् ? ॥ २९ ॥

दायादा इव दुर्दान्ताः, कषायाः क्षणमप्यहो ।
यद्विग्रहं न मुञ्चन्ति, कथं तस्यैकतासुखम् ? ॥ ३० ॥

स्वमनोवाक्तनूत्थानाः, कुव्यापाराः कुपुत्रवत् ।
भ्रंशाय यस्य यस्यन्ति, कथं तस्यैकतासुखम् ? ॥ ३१ ॥

15 'जिन, प्रत्येकबुद्ध वगेरे एकला विचरे छे,' एवा दृष्टान्तथी बीजा मुनिओए एकाकीपणानो आश्रय न करवो जोईए; कारण के ज्ञानचक्षुवाळाओनी साथे चर्मचक्षुवाळाओए स्पर्धा करवी ए योग्य नथी ॥ २५ ॥

अथवा तो चार गतिरूप संसारमा परिभ्रमण करनारा सर्व प्राणीओने पुण्य अने पाप साथे होवाथी तेओमां एकलापणु घटतुं नथी ॥ २६ ॥

चोवट करनारी स्त्रीओनी जेम आहारादि संज्ञाओ, कृष्णलेश्या वगेरे दुष्ट लेश्याओ अने स्त्रीकथा 20 वगेरे विकथाओ जेमना अंतःकरणरूप गृहमा चपलताने उत्पन्न करे छे ते एकाकी कई रीतिए थई शके ? ॥ २७ ॥

चाकणनी जेम अविरति नामनी नटडी जेने कोळिओ करी जवा सदा मथती होय, ते एकाकी केम थई शके ? ॥ २८ ॥

पचाग्निनी जेम असंतुष्ट एवु पाच इन्द्रियोरूपी कुटुम्ब जेना शरीरने बाळ्या करे छे, ते एकलो 25 सदेहरहितपणे केम रही शके ? ॥ २९ ॥

मर्यादिमा भाग मागनारा सगांवहालाओ दुर्दान्त (दुःखे करीने दबावी शकाय तेवा) कषायो क्षण वार पण जेना शरीरने छोडता नथी, तेने एकाकीपणानु सुख शी रीते होय ? ॥ ३० ॥

पोताना मन, वचन अने कायाथी उत्पन्न थयेला अशुभ व्यापारो स्वेच्छाचारी पुत्रनी जेम जेना नाश माटे प्रयत्न करी रह्या छे तेने एकाकीपणानु सुख शी रीते होय ? ॥ ३१ ॥

30 १. ०मज्ञानार्यां प्रिया ख., ०रयानार्यां प्रिया हि. ।

यस्य प्रमाद-मिथ्यात्व-रागाद्याश्छलवीक्षिणः ।
कुप्रातिवेश्मिकायन्ते, कथं तस्यैकतासुखम् ? ॥ ३२ ॥
य एभिरुज्झितः[1] सम्यक्, सजनेऽपि स एककः ।
जनाऽऽपूर्णेऽपि नगरे, यथा वैदेशिकः पुमान् ॥ ३३ ॥
एभिस्तु सहितो योगी, मुधैकाकित्वमश्नुते । 5
वण्ठः शठश्चरश्चौरः, किमु भ्राम्यति नैककः ? ॥ ३४ ॥
क्षीरं क्षीरं नीरं नीरं, दीपो दीपं सुधा सुधाम् ।
यथा सङ्गत्य लभते, तथैकत्वं मुनिर्मुनिम् ॥ ३५ ॥
पुण्य-पाप-क्षयान्मुक्ते, केवले परमात्मनि ।
अनाहारतया नित्यं, सत्यमैक्यं[2] प्रतिष्ठितम् ॥ ३६ ॥ 10
यद्वा श्रुतेऽत्र नाऽनुज्ञा, निषेधो वाऽस्ति सर्वथा ।
सम्यगाय-व्ययौ ज्ञात्वा, यतन्ते यति-सत्तमाः ॥ ३७ ॥
हूयते न दीयते न, न तप्यते न जप्यते ।
निष्क्रियैः साधुभिरहो साध्यते परमं पदम् ॥ ३८ ॥

छळने ज जोनारा प्रमाद, मिथ्यात्व अने रागादिक आन्तर शत्रुओ जेने दुष्ट पाडोशी जेवा 15 थाय छे, तेने एकाकीपणानु सुख शी रीते होय ? ॥ ३२ ॥

जेम मनुष्यथी भरपूर एवा नगरमां पण परदेशी माणस (कोईनी साथे संबंधवाळो नहीं होवाथी) एकलो ज कहेवाय छे, तेम जे पुरुष उपर कहेला दोषोथी रहित होय तो, ते जनसमूहमां रह्यो होय तो पण एकाकी ज छे । परंतु आ सर्व-संज्ञा, दुष्ट लेश्या, विकथा, इन्द्रिय, कषाय, दुष्टयोग, मिथ्यात्व अने रागादिथी सहित एवा योगीनुं एकाकीपणु फोगट छे । वठ, धूर्त, गुप्तचर के चोर ए शु एकलो नथी 20 भमतो ? ॥ ३३-३४ ॥

दूध-दूध, पाणी-पाणी, दीप-दीप अने अमृत-अमृतने जेम मुनि-मुनि पण साथे मळीने एकताने पामे छे ॥ ३५ ॥

पुण्य पापनो क्षय थवाथी मुक्त अने केवल एवा परमात्माने विषे अनाहारपणा वडे सदा साचुं एकाकीपणु प्रतिष्ठित छे ॥ ३६ ॥ 25

अथवा तो अहीं श्री जिनवचनने विषे एकांते विधि के निषेध नथी, तेथी श्रेष्ठ मुनिओ सारी रीते लाभालाभने जाणीने प्रवर्ते छे ॥ ३७ ॥

शैलेशीगत निष्क्रिय साधुओ वडे होम करातो नथी, दान देवातु नथी, तप तपातो नथी अने जप जपातो नथी, छतां पण परमपद सधाय छे ते आश्चर्य छे ॥ ३८ ॥

१. ०रुच्छ्रितः क. । २. ०त्वमनित्यं, ख. ग. घ. हि. ।

हूहू-गीतैरपि सुधा-रसैर्मन्दार-सौरभैः ।
दिव्यतल्प-सुखस्पर्शैः, सुरीरूपैर्न ये हृताः ॥ ३९ ॥

तत् किं ते तरवो यद्वा, शिशवो यदि वा मृगाः ?
न ते न ते न ते किन्तु, मुनयस्ते निरञ्जनाः ॥ ४० ॥

5 'णं'-कारोऽयं भणत्येवं, त्रिरेखो बिन्दु-शेखरः ।
गुप्तित्रये लब्धरेखाः सद्वृत्ताः स्युर्महर्षयः ॥ ४१ ॥

नवभेद-जीवरक्षा-सुधाकुण्ड-समाकृतिः ।
दत्तां नवाक्षरीयं मे, धर्मे भावं नवं नवम् ॥ ४२ ॥

इति पञ्चमः प्रकाशः समाप्तः ।

10 [षष्ठः प्रकाशः]

एष पञ्च-नमस्कारः, सर्व-पाप-प्रणाशनः ।
मङ्गलानां च सर्वेषां, मुख्यं भवति मङ्गलम् ॥ १ ॥

समिति-प्रयतः सम्यग्, गुप्तित्रय-पवित्रितः ।
अमुं पञ्च-नमस्कारं, यः स्मरत्युपवैणवम्* ॥ २ ॥

15 हूहू नामना गन्धर्वोना मनोहर गायनो, अमृतरस, कल्पवृक्षना पुष्पोनी सुगंध, दिव्यशय्यानो सुखकारक स्पर्श अने देवांगनाओना रूपो वडे पण जेओ आकर्षाता नथी, तेओ शु वृक्षो छे? बाळको छे? के शु हरणीया छे? ना! ना! ना! तेओ वृक्ष, बाळक के मृगला नथी; परन्तु तेओ तो निरंजन मुनिओ छे ॥ ३९-४० ॥

णंकार त्रण रेखावाळो अने माथे अनुस्वारवाळो छे, ते अहीं एम जणावे छे के त्रण गुप्तिना 20 पालनमा रेखाने (पराकाष्ठाने) पामेला महामुनिओ संपूर्ण सदाचारी होय छे ॥ ४१ ॥

नव प्रकारनी जीवरक्षारूप सुधाकुंड समान आकृतिवाळी 'नमो लोए सव्वसाहूण।' ए नवाक्षरी मने धर्मने विषे नवो भाव आपो ॥ ४२ ॥

छट्ठो प्रकाश

आ पंचपरमेष्ठी नमस्कार सर्व पापोनो नाश करनार छे अने सर्व मंगलोमां श्रेष्ठ मंगल छे ॥ १ ॥

25 सम्यक् प्रकारे पांच समितिने विषे प्रयत्नवाळो अने त्रण गुप्तिथी पवित्र थयेलो जे आत्मा आ पंच-परमेष्ठि-नमस्कारनु त्रिकाल ध्यान करे छे, तेने शत्रु मित्ररूप थाय छे, विष पण अमृतरूप बने छे,

* उपवैणव—त्रिसन्ध्यमित्यर्थः ।

शत्रुर्मित्रायते चित्रं, विषमप्यमृतायते ।
अशरण्याऽप्यरण्यानी, तस्य वासगृहायते ॥ ३ ॥
ग्रहाः सानुग्रहास्तस्य, तस्कराश्च यशस्कराः ।
समस्तं दुर्निमित्ताद्यमपि स्वस्ति फलेग्रहिः ॥ ४ ॥
न मन्त्र-तन्त्र-यन्त्राद्यास्तं प्रति प्रभविष्णवः । 5
सर्वापि शाकिनी द्रोह-जननी जननी इव ॥ ५ ॥
व्यालास्तस्य मृणालन्ति, गुञ्जापुञ्जन्ति वह्वयः ।
मृगेन्द्रा मृगधूर्तन्ति, मृगन्ति च मतङ्गजाः ॥ ६ ॥
तस्य रक्षोऽपि रक्षायै, भूतवर्गोऽपि भूतये ।
प्रेतोऽपि प्रीतये प्रायश्चेटत्वायैव चेटकः ॥ ७ ॥ 10
धनाय तस्य प्रधनं, रोगो भोगाय जायते ।
विपत्तिरपि सम्पत्त्यै, सर्वं दुःखं सुखायते ॥ ८ ॥
बन्धनैर्मुच्यते सर्वैः सर्पैश्चन्दनवज्जनः ।
श्रुत्वा धीरं ध्वनिं पञ्च-नमस्कार-गरुत्मतः ॥ ९ ॥
जल-स्थल-श्मशानाद्रि-दुर्गेष्वन्येष्वपि ध्रुवम् । 15
नमस्कारैकचित्तानामपायाः प्रोत्सवा इव ॥ १० ॥

शरणरहित मोटुं जगल पण रहेवा लायक घर जेवु बनी जाय छे, सर्वे ग्रहो तेने अनुकूळ थई जाय छे, चोरो यश आपनारा थाय छे, अनिष्टसूचक सर्व अपशकुनादि पण शुभ फळने आपनारा थाय छे, बीजाए प्रयोग करेला मत्र, तत्र अने यंत्रादिक तेनो पराभव करी शकता नथी, सर्व प्रकारनी शाकिनीओ पण मातानी जेम रक्षण करनारी थाय छे, सर्पो तेनी पासे कमळना नाळ जेवा थई जाय छे, अग्नि चणोठीना 20 ढगलारूप थाय छे, सिंहो शियाळ जेवा थाय छे, हाथीओ हरण जेवा थाय छे, राक्षस पण तेनुं रक्षण करे छे, भूतोनो समूह पण तेनी भूति (आबादी) ने माटे थाय छे, प्रेत पण प्राय: करीने तेने प्रीति करनारो थाय छे, चेटक (व्यतर) पण तेनो चेट (दास) बनी जाय छे, युद्ध तेने लाभ आपनारुं थाय छे, रोगो तेने भोग अपनारा थाय छे, विपत्ति पण तेने संपत्तिने माटे थाय छे अने सर्व प्रकारनु दुःख तेने सुख आपनारु थाय छे ॥ २ थी ८ ॥ 25

पंचनमस्काररूप गरुडनो गंभीर ध्वनि सांभळतां ज सर्पोथी चन्दनवृक्षनी जेम पुरुष सर्व बन्धनोथी मुक्त थाय छे ॥ ९ ॥

जेओनुं चित्त नमस्कारमां एकाग्र छे, तेओने जल, स्थल, श्मशान, पर्वत, दुर्ग अने तेवा बीजा पण स्थानोमां प्राप्त थतां कष्टो अवश्यमेव महोत्सवरूप बनी जाय छे ॥ १० ॥

पुण्यानुबन्धिपुण्यो यः, परमेष्ठि-नमस्कृतिम् ।
यथाविधि ध्यायति सः, स्यान्न तिर्यङ् न नारकः ॥ ११ ॥

चक्रि-विष्णु-प्रतिविष्णु-बलाद्यैश्वर्य-सम्पदः ।
नमस्कार-प्रभावाब्धेस्तट-मुक्तादि-सन्निभाः ॥ १२ ॥

5 वश्य-विद्वेषण-क्षोभ-स्तम्भ-मोहादि-कर्मसु ।
यथाविधि प्रयुक्तोऽयं, मन्त्रः सिद्धिं प्रयच्छति ॥ १३ ॥

उच्छेदं परविद्यानां, निमेषार्द्धात् करोत्यसौ ।
क्षुद्रात्मनां परावृत्ति-वेधं च विधिना स्मृतः ॥ १४ ॥

भूर्भुवःस्वस्त्रयीरङ्गे, यः कोप्यतिशयः किल ।
10 द्रव्य-क्षेत्र-काल-भावाऽपेक्षया चित्रकारकः ॥ १५ ॥

क्वचित् कथञ्चित् कस्यापि, श्रूयते दृश्यतेऽङ्गिनः ।
स सर्वोऽपि नमस्काराऽऽराध-माहात्म्यसम्भवः ॥ १६ ॥

तिर्यग्लोके चन्द्रमुख्याः, पाताले चमरादयः ।
सौधर्मादिषु शक्राद्यास्तदग्रेऽपि च ये सुराः ॥ १७ ॥

15 तेषां सर्वाः श्रियः पञ्च-परमेष्ठि-मरुत्तराः ।
अङ्कुरा वा पल्लवा वा, कलिका वा सुमानि वा ॥ १८ ॥

पुण्यानुबंधि पुण्यवाळो जे पुरुष विधिपूर्वक पंचपरमेष्ठी-नमस्कारनु ध्यान करे छे, ते तिर्यञ्च के नारक थतो नथी ॥ ११ ॥

चक्रवर्ती, वासुदेव, प्रतिवासुदेव अने बळदेव वगेरेना ऐश्वर्यनी संपदाओ नमस्कारना प्रभावरूपी 20 समुद्रना किनारे रहेला मुक्ताफल (मोती) वगेरे समान छे ॥ १२ ॥

विधिपूर्वक प्रयोग करायेल आ मंत्र वशीकरण, विद्वेषण, क्षोभ, स्तम्भन अने मोहन वगेरे कार्योमा सिद्धिने आपनारो थाय छे ॥ १३ ॥

विधिपूर्वक स्मरण करेलो आ मंत्र अर्धनिमेषमात्रमा ज परप्रयुक्त मलिन विद्याओनु उच्छेदन करे छे अने क्षुद्र जीवोए करेल रूपादिकना परावर्तनने (?) विंधी–विखेरी नाखे छे ॥ १४ ॥

25 स्वर्ग, मृत्यु अने पाताळ ए त्रण भुवनरूपी रंगमण्डपने विषे द्रव्य, क्षेत्र, काल अने भावने आश्रयीने जे कोई पण आश्चर्यकारक अतिशय कोई पण स्थळे, कोई पण प्रकारे, कोई पण प्राणीने थयेलो जोवामा के साभळवामा आवे छे, ते सर्व नमस्कारमंत्रनी आराधनाना प्रभावथी ज उत्पन्न थयो छे, एम जाणवु ॥१५-१६॥

तिर्यग्लोकमा जे चन्द्रप्रमुख ज्योतिष देवताओ छे, पाताळ लोकमा चमर वगेरे इन्द्रो छे, ऊर्ध्वलोकमा सौधर्मादिदेवलोकने विषे जे शक्र वगेरे इन्द्रो छे अने तेनी उपर पण जे अहमिन्द्र वगेरे देवताओ 30 छे, तेओनी सर्वसमृद्धिओ पंचपरमेष्ठिरूप कल्पवृक्षना अंकुरा, पल्लवो, कळीओ के पुष्प समान छे ॥१७-१८॥

ते गतास्ते गमिष्यन्ति, ते गच्छन्ति परम्पदम् ।
आरूढा निरपायं ये, नमस्कार-महारथम् ॥ १९ ॥

यदि तावदसौ मन्त्रः, शिवं दत्ते सुदुर्लभम् ।
ततस्तदनुषङ्गोत्थे, गणना का फलान्तरे ॥ २० ॥

जपन्ति ये नमस्कार-लक्षं पूर्णं त्रिशुद्धितः ।
जिनसंघ-पूजिभिस्तैस्तीर्थकृत्कर्म बध्यते ॥ २१ ॥

किं तपः-श्रुत-चारित्रैः, चिरमाचरितैरपि ।
सखे ! यदि नमस्कारे, मनो लेलीयते न ते ? ॥ २२ ॥

योऽसंख्य-दुःखक्षय-कारण-स्मृति-[2]
र्य ऐहिकामुष्मिक-सौख्य-कामधुक् ।
यो दुष्षमायामपि कल्पपादपो,
मन्त्राधिराजः स कथं न जप्यते ? ॥ २३ ॥

न यद्दीपेन सूर्येण, चन्द्रेणाप्यपरेण वा ।
तमस्तदपि निर्नाम, स्यान्नमस्कार-तेजसा ॥ २४ ॥

जेओ अपायरहित एवा नमस्काररूप महारथमां आरूढ थया, तेओ परमपदने पाम्या छे, पामे छे अने पामशे ॥ १९ ॥

जो आ मत्र अत्यन्त दुर्लभ एवा परमपदने पण आपे छे, तो तेनी पूर्वमां प्राप्त थतां आनुषंगिक एवा बीजा फळोनी गणत्री शी ? ॥ २० ॥

श्री जिनेश्वर देव अने श्री संघने पूजनारा जे भव्यात्माओ त्रिकरण शुद्धि वडे एक लाख नवकारनो जाप करे छे तेओ तीर्थंकरनामकर्म उपार्जन करे छे ॥ २१ ॥

हे मित्र ! जो तारुं मन नमस्कारनुं ध्यान करवामां लयलीन नथी थतुं, तो चिरकाल सुधी आचरण करेला तप, श्रुत अने चारित्रनी क्रियाओनुं शु फळ ? ॥ २२ ॥

जेनी स्मृति असंख्य दुःखोना क्षयनु कारण गणाय छे, जे आ लोक अने परलोकनां सुख आपवामां कामधेनु समान छे अने जे दुःषम काळमां पण कल्पवृक्ष समान छे ते मंत्राधिराज केम न जपाय ? ॥ २३ ॥

जे अंधकार दीवाथी, सूर्यथी, चन्द्रथी के बीजा कोई पण तेजथी नाश नथी पामतो, ते (मोहरूप) अंधकार पण नमस्कारना तेज वडे नामशेष थई जाय छे ॥ २४ ॥

१. ०पूजितैस्तै० हि. । २. स्मृतो हि. ।

कृष्ण-शाम्बादिवद् भाव-नमस्कार-परो भव ।
मा वीर-पालक-न्यायात्[१], मुधाऽऽत्मानं विडम्बय ॥ २५ ॥

यथा नक्षत्रमालायां, स्वामी पीयूषदीधितिः ।
तथा भाव-नमस्कारः, सर्वस्यां पुण्यसंहतौ ॥ २६ ॥

5 जीवेनाकृतकृत्यानि, विना भावनमस्कृतिम् ।
गृहीतानि विमुक्तानि, द्रव्यलिङ्गान्यनन्तशः ॥ २७ ॥

अष्टावष्टौ शतान्यष्टसहस्राण्यष्टकोटयः ।
विधिध्याता नमस्काराः, सिद्धयेऽन्तर्भवत्रयम् ॥ २८ ॥

धर्मबान्धव ! निश्छद्म पुनरुक्तं त्वमर्थ्यसे ।
10 संसारार्णव-बोहित्थे माऽत्र मन्त्रे श्लथो भव ॥ २९ ॥

अवश्यं यदसौ भाव-नमस्कारः परं महः ।
स्वर्गापवर्ग-सन्मार्गो, दुर्गति-प्रलयानिलः[२] ॥ ३० ॥

शिवतातिः सदा सम्यक्, पठितो गुणितः श्रुतः ।
समनुप्रेक्षितो भव्यैर्विशिष्याऽऽराधना-क्षणे ॥ ३१ ॥

---

15 हे आत्मन ! तु कृष्ण अने शाम्ब वगेरेनी जेम भावनमस्कार करवामा तत्पर था, पण कृष्णना सेवक वीरा साळवी अने कृष्णना अभव्य पुत्र पालक वगेरेनी जेम द्रव्यनमस्कार करी फोगट आत्माने विडबना न पमाड ॥ २५ ॥

जेम नक्षत्रोना समुदायनो स्वामी चन्द्र छे, तेम सर्व पुण्यसमूहनो स्वामी भावनमस्कार छे ॥ २६ ॥

आ जीवे अनन्तीवार द्रव्यलिंगो (साधुवेष) ग्रहण कर्या छे अने छोड्या छे पण भावनमस्कारनी 20 प्राप्ति विना ते सर्व मोक्षरूपी कार्य साधवामा निष्फळ निवड्या छे ॥ २७ ॥

शास्त्रोक्त विधिपूर्वक नमस्कारमन्त्रनो आठ करोड, आठ हजार, आठ सो अने आठ वार जाप कर्यो होय तो ते मात्र त्रण ज भवनी अदर मोक्ष आपे छे ॥ २८ ॥

हे धर्मबन्धु ! सरळ भावे फरीथी तने प्रार्थना करु छुं के ससार-समुद्रमां जहाज समान आ नमस्कार मत्र गणवामा तु प्रमादी न था ॥ २९ ॥

25 नक्की आ भावनमस्कार उत्कृष्ट–सर्वोत्तम तेज छे, स्वर्ग अने मोक्षनो साचो मार्ग छे, तथा दुर्गतिनो नाश करवामां प्रलयकाळना पवन समान छे ॥ ३० ॥

मोक्षनी सोपानपक्ति समान आ भावनमस्कार भव्यो वडे सदा पठन करायो छे, गणायो छे, संभळायो अने चिंचिनित करायो छे; तेमा पण अतिम मरणकालीन आराधनानी क्षणे ते विशेषे करीने पठन, गुणन, श्रवण अने चिंतन करायो छे ॥ ३१ ॥

---

30 १. ०न्यावत् क. हि. । २. ०यानलः ख. ग. हि. ।

प्रदीप्ते भवने यद्वच्छेषं मुक्त्वा गृही सुधीः ।
गृह्णात्येकं महारत्नमापन्निस्तारण-क्षमम् ॥ ३२ ॥
आकालिक-रणोत्पाते, यथा कोऽपि महाभटः ।
अमोघमस्त्रमादत्ते, सारं दम्भोलि-दण्डवत् ॥ ३३ ॥
एवं नाशक्षणे सर्व-श्रुतस्कन्धस्य चिन्तने । 5
प्रायेण न क्षमो जीवस्तस्मात्तद्गत-मानसः ॥ ३४ ॥
द्वादशाङ्गोपनिषदं, परमेष्ठि-नमस्कृतिम् ।
धीरधीः सल्लसल्लेश्यः, कोऽपि स्मरति सात्त्विकः ॥ ३५ ॥
समुद्रादिव पीयूषं, चन्दनं मलयादिव ।
नवनीतं यथा दध्नो, वज्रं वा रोहणादिव ॥ ३६ ॥ 10
आगमादुद्धृतं सर्व-सारं कल्याणसेवधिम् ।
परमेष्ठि-नमस्कारं, धन्याः केचिदुपासते ॥ ३७ ॥
संविग्न-मानसाः स्पष्ट-गम्भीर-मधुर-स्वराः ।
योगमुद्राधर-कराः, शुचयः कमलासनाः ॥ ३८ ॥
उच्चरेयुः स्वयं सम्यक्, पूर्णां पञ्च-नमस्कृतिम् । 15
उत्सर्गतो विधिरयं, ग्लान्याऽन्नैते न चेत्क्षमाः ॥ ३९ ॥

जेम घरमा आग लागे त्यारे बुद्धिशाळी घरनो मालीक बीजी बधी वस्तु मूकी दईने आपत्तिसमये रक्षण करवामा समर्थ एवा एक सारभूत महाकिमती रत्नने ज ग्रहण करे छे, अथवा कोई मोटो सुभट अकाळे प्राप्त थयेला रणसंग्राममां वज्रदंड समान सारभूत अमोघ शस्त्रने ज धारण करे छे, ए ज प्रमाणे मरणसमये के ज्यारे प्रायः सर्व श्रुतस्कंधनु (सर्व शास्त्रोनु) चिंतवन करी शकातुं नथी, त्यारे धीर बुद्धिवाळो 20 अने विशुध्यमान शुभ लेश्यावाळो कोईक सात्त्विक जीव द्वादशांगीना सारभूत आ पंचपरमेष्ठि नमस्कारनु ज एकाग्रचित्ते स्मरण करे छे ॥ ३२-३३-३४-३५ ॥

समुद्रमांथी अमृतनी जेम, मलयाचल पर्वतमांथी चंदननी जेम, दहींमांथी माखणनी जेम अने रोहणाचल पर्वतमांथी वज्ररत्ननी जेम, आगममांथी उद्धरेला सर्वश्रुतना सारभूत अने कल्याणना खजाना समान आ पंचपरमेष्ठि नमस्कारनुं कोईक धन्य पुरुषो ज मनन-चिंतवन करे छे ॥ ३६-३७ ॥ 25

शरीरथी पवित्र बनीने, पद्मासने बेसीने, हाथ वडे योगमुद्रा धारण करीने अने संवेग (मोक्षनी अभिलाषा) युक्त मनवाळा भव्य प्राणीए स्पष्ट, गंभीर अने मधुर स्वरे संपूर्ण पंचनमस्कारनो उच्चार करवो। आ विधि उत्सर्गथी जाणवो ॥ ३८-३९ ॥

१. अका. ख. ग. हि. । २. यद्वा ख. ग. हि. । ३न्या चैते ग. हि. ।

'असिआउसे'ति मन्त्रं, तन्नामाद्यक्षराङ्कितम् ।
स्मरन्तो जन्तवोऽनन्ताः, मुच्यन्तेऽन्तक-बन्धनात् ॥ ४० ॥
अर्हदरूपाचार्योपाध्याय-मुन्यादिमाक्षरैः ।
सन्धि-प्रयोग-संश्लिष्टैरोङ्कारं वा विदुर्जिनाः ॥ ४१ ॥
5 व्यक्ता मुक्तात्मनां मुक्तिर्मोह-स्तम्बेरमाङ्कुशः ।
प्रणीतः प्रणवः प्राज्ञैर्भवार्त्ति-च्छेद-कर्त्तरी ॥ ४२ ॥
ओमिति ध्यायतां तत्त्वं, स्वर्गार्गलक-कुञ्चिकाम् ।
जीविते मरणे वापि, भुक्तिर्मुक्तिर्महात्मनाम् ॥ ४३ ॥
सर्वथाऽप्यक्षमो दैवाद्, यद्वाऽन्ते धर्म-बान्धवात् ।
10 शृण्वन् मन्त्रममुं चित्ते, धर्मात्मा भावयेदिति ॥ ४४ ॥
अमृतैः किमहं सिक्तः, सर्वाङ्गं यदि वा कृतः ।
सर्वानन्दमयोऽकाण्डे, केनाऽप्यनघ-बन्धुना ॥ ४५ ॥
परं पुण्यं परं श्रेयः, परं मङ्गलकारणम् ।
यदिदानीं श्रावितोऽहं, पञ्चनाथ-नमस्कृतिम् ॥ ४६ ॥

15 (हवे अपवाद-विधि कहे छे :—) जो शारीरिक मादगीना कारणे पोते सम्पूर्ण नमस्कारनो उच्चार करवा समर्थ न होय तो ए ज पच परमेष्ठीना पहेला पहेला अक्षरथी उत्पन्न थयेला 'असिआउसा' ए मंत्रनुं स्मरण करे, कारण के आ पाच अक्षरना स्मरणथी पण जीवो अनंत एवा मरणना बधनथी मुक्त थया छे ॥४०॥

जेमने कोई प्राणान्त मादगीमां उपर कहेला पांच अक्षररूप मंत्रनु स्मरण पण शक्य न होय तेमना माटे श्री जिनेश्वरोए अर्हत् (अरिहंत), अरूपी (सिद्ध), आचार्य, उपाध्याय अने मुनि ए पांच परमेष्ठिनां 20 प्रथम अक्षरोने व्याकरणना सधि-नियमो लगाडीने सिद्ध थयेल (अ+अ=आ, आ+आ=आ, आ+उ=ओ, ओ+म्=) 'ॐ'कार कहेल छे, तेनु स्मरण करवु। कारण के तेमां पण पाच परमेष्ठिओ आवी जाय छे ॥४१॥

प्राज्ञ पुरुषोए कह्यु छे के आ 'ॐ'कार मुक्तात्माओनी साक्षात् मुक्ति, मोहरूपी हाथीने वश करनार अकुश अने संसारनी पीडाने छेदनारी कातर छे ॥ ४२ ॥

स्वर्गना दरवाजा उघाडवा माटे कुंची समान आ 'ॐ'काररूपी तत्त्वनु ध्यान करनार महात्माओने 25 जीवे त्यांसुधी भोगो मळे छे अने मर्या पछी मुक्ति मळे छे ॥ ४३ ॥

अथवा तो भाग्यवशात् मृत्यु समये सर्व प्रकारे आ ॐकारनुं स्मरण करवामां पण पोते अशक्त होय तो ते साधर्मिक बंधु पासेथी आ मत्रनु श्रवण करे अने ते वखते चित्तमा आ प्रमाणे भावना भावे ॥ ४४ ॥

शु कोईक पुण्यशाळी बधुए अकाळे मारा समग्र शरीरे अमृत छांटयुं ? अथवा तो शुं हुं तेना वडे सम्पूर्ण आनन्द-स्वरूप करायो ? कारण के हमणां मने तेणे श्रेष्ठ पुण्यरूप, श्रेष्ठ कल्याणरूप अने मगळना 30 श्रेष्ठ कारणरूप पचपरमेष्ठि-नमस्कार मंत्र संभळाव्यो ॥ ४५-४६ ॥

१. ०द्याक्ष० ख. ग. घ. हि. । २. ०न्तात् क. घ. । ३. शुक्ति० ख. ग. घ. हि. ।

अहो! दुर्लभ लाभो मे, ममाऽहो! प्रियसङ्गमः ।
अहो! तत्व-प्रकाशो मे, सारमुष्टिरहो! मम ॥ ४७ ॥

अद्य कष्टानि नष्टानि, दुरितं दूरतो ययौ ।
प्राप्तं पारं भवाम्भोधेः, श्रुत्वा पञ्च-नमस्कृतिम् ॥ ४८ ॥

प्रशमो देव-गुर्वाज्ञा-पालनं नियमस्तपः । 5
अद्य मे सफलं जज्ञे[1], श्रुत-पञ्च-नमस्कृतेः ॥ ४९ ॥

स्वर्णस्येवाग्नि-सम्पातो[2], दिष्टया मे विपदप्यभूत् ।
यल्लेभेऽद्य मयाऽनर्घ्यं[3] परमेष्ठिमयं महः ॥ ५० ॥

एवं शम-रसोल्लास-पूर्वं श्रुत्वा नमस्कृतिम् ।
निहत्य क्लिष्टकर्माणि, सुधीः श्रयति सद्गतिम् ॥ ५१ ॥ 10

उत्पद्योत्तमदेवेषु, विपुलेषु कुलेष्वपि ।
अन्तर्भवाष्टकं सिद्धः, स्यान्नमस्कार-भक्तिभाक् ॥ ५२ ॥

इति षष्ठः प्रकाशः समाप्तः ॥

अहो! आ पचपरमेष्ठि-नमस्कारनुं श्रवण करवाथी मने दुर्लभ वस्तुनो लाभ थयो! अहो! मने प्रिय वस्तुनो समागम थयो! अहो! मने तत्त्वनो प्रकाश थयो अने अहो! मने सारभूत उत्तम वस्तुनुं 15 सम्पूर्ण रहस्य प्राप्त थयुं छे ॥ ४७ ॥

आ पंचपरमेष्ठि-नमस्कारना श्रवणथी आजे मारां कष्टो नाश पाम्यां, मारुं पाप दूरथी चाल्युं गयु अने आजे हुं संसारसागरना पारने पाम्यो ॥ ४८ ॥

पंचपरमेष्ठि-नमस्कार मंत्रनु श्रवण करवाथी आजे मारो प्रशम, देव तथा गुरुनी आज्ञानुं पालन, नियम अने तप ए सघळुं य सफळ थयुं ॥ ४९ ॥ 20

अग्निनो संयोग जेम सुवर्णने निर्मळ करे छे, ते ज रीतिए आ मादगीनी विपत्ति पण मारे कल्याणने माटे थई, कारण के आजे परमेष्ठि-स्वरूप अमूल्य तेज में प्राप्त कर्युं ॥ ५० ॥

आ प्रमाणे प्रशम-रसना उल्लासपूर्वक पंचपरमेष्ठि-नमस्कारनुं श्रवण करी अने क्लिष्ट कर्मने नाश करी बुद्धिमान पुरुष सद्गतिने पामे छे ॥ ५१ ॥

नमस्कार मत्रनी भावपूर्वक भक्ति करनार ते प्राणी त्यां (सद्गतिमां) उत्तम देवलोकोमां उत्पन्न 25 थई त्यांथी च्यवी, श्रेष्ठ मनुष्यकुलोमां जन्म पामीने, आठ भवनी अदर सिद्ध थाय छे ॥ ५२ ॥

---

१. जन्म, ख. ग. घ. हि. । २. सन्तापो, ख. हि. । ३. महानर्घ्यं ख. ग. हि. ।

[सप्तमः प्रकाशः]

सदा नामाकृतिद्रव्य-भावैस्त्रैलोक्य-पावनाः ।
क्षेत्रे काले च सर्वत्र, शरणं मे जिनेश्वराः ॥ १ ॥

तेऽतीताः केवलज्ञानि-प्रमुखा ऋषभादयः ।
वर्त्तमाना भविष्यन्तः, पद्मनाभादयो जिनाः ॥ २ ॥

सीमान्धराद्या अर्हन्तो, विहरन्तोऽथ शाश्वताः ।
चन्द्रानन-वारिषेण-वर्द्धमानर्षभाश्च ते ॥ ३ ॥

संख्यातास्ते वर्त्तमानाः, अनन्तातीतभाविनः ।
सर्वेष्वपि विदेहेषु, भरतैरावतेषु च ॥ ४ ॥

ते केवलज्ञान-विकाश-भासुराः, निराकृताष्टादश-दोष-विप्लवाः ।
असंख्य-वास्तोष्पति-वन्दितांह्रयः, सत्प्रातिहार्यातिशयैः समाश्रिताः ॥ ५ ॥

जगत्त्रयी-बोधिद-पञ्च-संयुत-त्रिंशद्गुणालङ्कृत-देशना-गिरः ।
अनुत्तर-स्वर्गिगणैः सदा स्मृताः, अनन्यदेयाक्षर-मार्गदायिनः ॥ ६ ॥

सातमो प्रकाश

सर्व काळ अने सर्व क्षेत्रमां नाम, स्थापना, द्रव्य अने भाव वडे त्रण लोकने सदा पवित्र करनारा श्री जिनेश्वर भगवंतो मने शरण हो ॥ १ ॥

ते जिनेश्वरो अतीतकाळे श्री केवळज्ञानी स्वामी वगेरे थया हता, वर्तमानकाळे श्री ऋषभदेवस्वामी वगेरे थया छे अने आगामिकाळे श्री पद्मनाभ स्वामी वगेरे थवाना छे ॥ २ ॥

श्री सीमंधरस्वामी वगेरे वीस विहरमान तीर्थंकरो छे। श्री चन्द्रानन, श्री वारिषेण, श्री वर्धमान अने श्री ऋषभ ए नामना चार शाश्वत तीर्थंकरो छे ॥ ३ ॥

सर्व विदेह, सर्व भरत अने सर्व ऐरावतने विषे वर्तमानकाळे संख्याता जिनेश्वरो होय छे, अने अतीत तथा अनागत काळने आश्रयीने अनन्ता जिनेश्वरो होय छे ॥ ४ ॥

ते सर्व तीर्थंकर भगवंतो केवळज्ञानना प्रकाशथी देदीप्यमान, अढार दोषोना उपद्रवोथी रहित, असंख्य इन्द्रोथी वंदित चरणकमळवाळा, उत्तम प्रकारना आठ प्रातिहार्य अने चोत्रीश अतिशयो वडे शोभता, त्रण जगतना प्राणीओने समकित आपनार, पात्रीश गुणोथी शोभता देशनाना वचनवाळा, अनुत्तरविमानमां रहेला देवो वडे सदा स्मरण करायेला अने बीजाओ न आपी शके तेवा मोक्षमार्गने आपनारा होय छे ॥ ५-६ ॥

दुरितं दूरतो याति, साधिव्याधिः प्रणश्यति ।
दारिद्र्यमुद्रा विद्राति, सम्यग्दृष्टे जिनेश्वरे ॥ ७ ॥
निन्द्येन मांसखण्डेन, किं तया जिह्वया नृणाम् ।
माहात्म्यं या जिनेन्द्राणां, न स्तवीति क्षणे क्षणे ॥ ८ ॥
अर्हच्चरित्र-माधुर्य-सुधास्वादानभिज्ञयोः । 5
कर्णयोश्छिद्रयोर्वाऽपि, स्वल्पमप्यस्ति नान्तरम् ॥ ९ ॥
सर्वातिशय-सम्पन्नां, ये जिनार्चां न पश्यतः ।
न ते विलोचने किन्तु, वदनालय-जालके ॥ १० ॥
अनार्येऽपि वसन् देशे, श्रीमानार्द्रकुमारकः ।
अर्हतः प्रतिमां दृष्ट्वा, जज्ञे संसार-पारगः ॥ ११ ॥ 10
जिन-बिम्बेक्षणाज्ज्ञात-तत्त्वः शय्यम्भव-द्विजः ।
निषेव्य सुगुरोः पादानुत्तमार्थमसाधयत् ॥ १२ ॥
अहो ! सात्त्विक-मूर्द्धन्यो, वज्रकर्णो महीपतिः ।
सर्वनाशेऽपि योऽन्यस्मै, न ननाम जिनं विना ॥ १३ ॥

श्री जिनेश्वरनुं सम्यक् प्रकारे दर्शन थता ज प्राणीओना पापो अत्यन्त दूर चाल्या जाय छे, 15 आधि (मननी पीडा) अने व्याधि (शरीरनी पीडा) नाश पामे छे; तथा दरिद्रतानी मुद्रा जती रहे छे ॥ ७ ॥

जे जीभ श्री जिनेश्वरना माहात्म्यनी क्षणे क्षणे स्तुति न करे, ते निंदवा लायक मांसना टुकडा जेवी जिह्वा शा कामनी ? ॥ ८ ॥

जे कान श्री अरिहंतना चरित्रनी मधुरता रूप अमृतना आस्वादथी अजाण होय, ते कान 20 अथवा छिद्रमां कई पण तफावत नथी ॥ ९ ॥

सर्व अतिशयोथी संपन्न एवी श्री जिनप्रतिमाने जे नेत्रो जोता नथी ते नेत्र नथी, परन्तु मुखरूपी घरना जाळीयां छे ॥ १० ॥

अनार्य देशमा वसता छतां पण श्रीमान् आर्द्रकुमार श्रीअरिहंत भगवंतनी प्रतिमाने निहाळीने संसार-सागरना पारगामी थया हता ॥ ११ ॥ 25

श्री जिनप्रतिमाना दर्शनथी श्रीशय्यंभव नामना ब्राह्मणे तत्त्वने जाण्यु अने ते पछी श्री सुगुरुना चरण-कमळनी सेवा करीने तेओ उत्तमार्थ-मोक्षने पाम्या ॥ १२ ॥

अहो ! सात्त्विक-शिरोमणि **श्रीवज्रकर्ण** नामना राजाए राज्य वगेरे सर्व वस्तुनो नाश उपस्थित थवा छतां पण एक जिनेश्वर देव विना बीजाने नमस्कार न कर्यो ते न ज कर्यो ॥ १३ ॥

देवतत्त्वे गुरुतत्त्वे, धर्मतत्त्वे स्थिरात्मनः।
वालिनो वानरेन्द्रस्य, महनीयमहो! महः ॥ १४ ॥

सुलसाया महासत्या भूयासमवतारणम्[1]।
सम्भावयति कल्याण-वार्त्तया त्रिजगद्गुरुः[2] ॥ १५ ॥

5 श्रीवीरं वन्दितुं भावाचलितौ दर्दुरावपि।
मृत्वा सौधर्मकल्पान्तर्जातौ शक्रसमौ सुरौ ॥ १६ ॥

हासा-प्रहासा-पतिराभियोग्य-दुष्कर्म-निर्विण्णमनाः सुरोऽपि।
देवाधिदेव-प्रतिमां क्षमायां, प्राकाशयत् स्वात्मविमोचनाय ॥ १७ ॥

जिनांह्रिसेवाहृत-पापतापः, त्रैलोक्य-कुक्षिम्भरि-सत्प्रतापः।
10 श्रीचेटको नाम महाक्षमापः, सुरेन्द्र-चित्तेष्वपि वासमाप ॥ १८ ॥

अष्टाह्निका-पर्व सुपर्वनाथाः, कुर्वन्ति सर्वे जिनमन्दिरेषु।
नित्येषु नन्दीश्वर-मुख्यतीर्था-लङ्कारभूतेषु भवाभिभूत्यै ॥ १९ ॥

देव तत्त्व, गुरु तत्त्व अने धर्म तत्त्वमा स्थिर आशयवाळा वानर द्वीपना स्वामी **वाली** राजानु तेज--पराक्रम खरेखर पूजवा लायक हतु ॥ १४ ॥

15 त्रण जगतना गुरु श्री **महावीर** परमात्माए पण सुख-शाताना समाचार कहेवरावतामा जेणीने याद करी हती, ते महासती श्री **सुलसानां** हु ओवारणां लऊ छुं ॥ १५ ॥

श्री वीरप्रभुने भावथी वदन करवा आवता बे देडकाओ पण रस्तामां ज मरीने सौधर्मदेवलोकमा इद्रसमान देवताओ थया [**सेडुक** नामना ब्राह्मणनो जीव अने नंदमणियारनो जीव देडकाना भवमा श्री महावीर परमात्माने भावथी वदन करवा जतां मार्गमां ज (श्रेणिक राजाना घोडाना पग तळे दबाईने) 20 मरण पामी प्रभु वदननु ध्यान होवाथी सौधर्मदेवलोकमा शक्रेन्द्रनो सामानिक देव थयो] ॥ १६ ॥

कुमारनंदी सोनीनो जीव मरीने देवलोकमां **हासा** अने **प्रहासा** नामनी देवीओनो पति थवा छता पण आभियोगिक देवने योग्य हलकां कार्यो करवाथी मनमा अत्यन्त खेद पाम्यो हतो, तेथी तेणे पोताना आत्माने ते दुष्कर्मथी मुक्त करवा माटे देवाधिदेवनी प्रतिमा पृथ्वी ऊपर प्रगट करी हती ॥ १७ ॥

श्री चेटक (चेडा) नामना महाराजाए श्रीजिनेश्वरना चरणकमळनी सेवा वडे पोताना सर्व 25 पापना तापनो नाश कर्यो हतो, तेथी तेमनो सुदर प्रताप त्रणे भुवनमां प्रसरी गयो हतो अने तेओ इन्द्रोना हृदयोमा पण स्थान पाम्या हता ॥ १८ ॥

सर्व देवेन्द्रो संसारनो ह्रास करवा माटे नंदीश्वरादिक तीर्थोना अलङ्कारसमा शाश्वता जिनमंदिरोमां अट्ठाई-महोत्सव करे छे ॥ १९ ॥

---

१. भूयाः समवतारणम् **क.**, भूयांसमवधारण **हि.**। २. वार्त्तया या जगद्गुरुम् **क.**, वार्त्तया यां जगद्गुरुः **ख.**।

श्रूयते चरमाम्भोधौ, जिन-बिम्बाकृतेस्तिमेः।
नमस्कृति-परो मीनो, जातस्मृतिर्दिवं ययौ ॥ २० ॥
नृ-सुरासुर-साम्राज्यं, भुज्यते यदशङ्कितम्।
जिन-पाद-प्रसादानां लीलायित-लवो हि सः ॥ २१ ॥
नृलोके चक्रवर्त्याद्याः, शक्राद्याः सुरसद्मनि। 5
पाताले धरणेन्द्राद्या जयन्ति जिन-भक्तितः ॥ २२ ॥
मुकुटीकृत-जैनाज्ञा, रुद्रा एकादशाऽप्यहो!।
केचित्तीर्णास्तरिष्यन्ति, परे[1] संसार-सागरम् ॥ २३ ॥
वह्नि-ज्वाला इव जले, विषोर्मय इवाऽमृते।
जिनसाम्ये विलीयन्ते, हरादीनां कथा-प्रथाः ॥ २४ ॥ 10
तानि जैनेन्द्र-वृत्तानि, सम्यग् विमृशतां सताम्।
अत्राप्यानन्दमग्नानां, युक्तं मोक्षेऽपि न स्पृहा ॥ २५ ॥
यथा तोयेन शाम्यन्ति, तृषोऽन्नेन क्षुधो यथा।
जिन-दर्शनमात्रेण, तथैकेन भवार्त्तयः ॥ २६ ॥

वळी शास्त्रोमा संभळाय छे के स्वयम्भूरमण नामना छेल्ला समुद्रमा जिनबिंबना आकारवाळा 15 मत्स्यने जोई बीजा मत्स्यने जाति-स्मरण ज्ञान थयु अने नमस्कार मंत्रनुं ध्यान करी त्यांथी मरीने देवलोकमा गयो ॥ २० ॥

मनुष्य, देव अने असुरोनुं स्वामीपणु जे निःशंकपणे भोगवाय छे ते श्री जिनेश्वरभगवंतना चरणोनी कृपानी लीलानो एक लेश मात्र छे ॥ २१ ॥

मनुष्यलोकमां चक्रवर्ती वगेरे राजाओ, स्वर्गलोकमा इन्द्रादिदेवो अने पाताळ लोकमां धरणेन्द्र 20 वगेरे भुवनपतिना इन्द्रो जिनेश्वरनी भक्तिथी ज जयवंता वर्ते छे ॥ २२ ॥

श्री जिनेश्वरनी आज्ञाने मुकुटनी जेम मस्तके धारण करीने अहो! अगियारे रुद्रोमाथी केटलाक ए ज भवमां मोक्षे गया छे अने बाकीना आगामी भवोमां मोक्षे जवाना छे ॥ २३ ॥

जेम पाणीमां अग्निनी ज्वाला नाश पामी जाय छे अने जेम अमृतने विषे विषनो प्रभाव नष्ट थई जाय छे, तेम श्री जिनेश्वरभगवंतनी समना-चरित्रनी वर्णनामां शंकर वगेरे देवोनी कथाओनो 25 विस्तार विलय पामे छे ॥ २४ ॥

श्री जिनेश्वरोना ते चरित्रोनुं सम्यक् प्रकारे चिंतन करनारा सत्पुरुषो आ संसारमां पण आनंदमग्न रहे छे अने तेथी खरेखर! तेओने मोक्षमां पण स्पृहा रहेती नथी ॥ २५ ॥

जेम जल वडे तृषा शान्त थाय छे, तथा अन्न वडे क्षुधा शान्त थाय छे, तेम श्री जिनेश्वरना एक दर्शनमात्रथी ज संसारनी सर्व पीडाओ शान्त थई जाय छे—नाश पामे छे ॥ २६ ॥ 30

१. पारेस० ख. घ.।

अतिकोटिः समाः सम्यक्, समाधीन् समुपासताम् ।
नार्हदाज्ञां विना यान्ति, तथापि शमिनः शिवम् ॥ २७ ॥

न दानेनाऽनिदानेन, न शीलैः परिशीलितैः ।
न शस्याभिस्तपस्याभिरजैनानां परं पदम् ॥ २८ ॥

5 भास्वता वासर इव, पूर्णिमेवाऽमृतांशुना ।
सुभिक्षमिव मेघेन, जिनेनैवाव्ययं महः ॥ २९ ॥

अक्षायत्तं यथा द्यूतं, मेघाधीना यथा कृषिः ।
तथा शिवपुरे वासो, जिन-ध्यान-वशंवदः ॥ ३० ॥

सुलभास्त्रिजगल्लक्ष्म्यः, सुलभाः सिद्धयोऽष्ट ताः ।
10 जिनांह्रि-नीरज-रजःकणिकास्त्वतिदुर्लभाः ॥ ३१ ॥

अहो ! कष्टमहो ! कष्टं, जिनं प्राप्यापि यज्जनाः ।
केचिन्मिथ्यादृशो बाढं, दिनेशमिव कौशिकाः ॥ ३२ ॥

जिन एव महादेवः, स्वयम्भूः पुरुषोत्तमः ।
परात्मा सुगतोऽलक्ष्यो, भूर्भुवःस्वस्त्रये(यी)श्वरः[1] ॥ ३३ ॥

15 जितेन्द्रिय एवा अन्यदर्शनीओ भले करोडो वर्षोथी पण अधिक काळ सुधी समाधिओनी उपासना करे, परन्तु श्री जिनाज्ञा विना तेओ कदापि मोक्षे जता नथी ॥ २७ ॥

रागादि शत्रुओना जेता श्री जिनेश्वर परमात्मा जेओना देव नथी, तेओ भले नियाणारहित दान करे, निर्मळ शील पाळे, तथा प्रशंसा करवा योग्य तप करे, तो पण तेमने परमपदनी प्राप्ति नथी ॥ २८ ॥

20 जेम सूर्य वडे दिवस थाय छे, चन्द्र वडे पूर्णिमा थाय छे अने वृष्टि वडे सुभिक्ष (सुकाळ) थाय छे, तेम श्री जिनेश्वर वडे ज अविनाशी तेजनी-केवलज्ञाननी प्राप्ति थाय छे ॥ २९ ॥

जेम जुगार पासाने आधीन छे अने खेती वृष्टिने आधीन छे, तेम शिवपुरमां वसवुं ते श्री जिनेश्वरना ध्यानने ज आधीन छे ॥ ३० ॥

त्रण जगतनी लक्ष्मी प्राप्त थवी सुलभ छे, तथा अणिमादिक आठ सिद्धिओनी प्राप्ति थवी सुलभ 25 छे, परन्तु जिनेश्वरना चरणकमळना रजकणो प्राप्त थवा अत्यन्त दुर्लभ छे ॥ ३१ ॥

अहो ! खेदनी वात छे के जिनेश्वरने पामीने पण केटलाक जीवो सूर्यना प्रकाशमां घूवडनी जेम गाढ मिथ्यादृष्टि रहे छे ॥ ३२ ॥

जिनेश्वर ज महादेव छे, ब्रह्मा छे, विष्णु छे, परमात्मा छे, सुगत (बुद्ध) छे, अलक्ष्य छे तथा स्वर्ग, मृत्यु अने पाताळने विषे ईश्वर छे ॥ ३३ ॥

30 १. स्वःसुरेश्वरः ग.–हि., स्वःशिवेश्वरः ख. घ. ।

त्रैगुण्य-गोचरा संज्ञा, बुद्धेशानादिषु स्थिता ।
या लोकोत्तर-सत्त्वोत्था, सा सर्वाऽपि परं जिने ॥ ३४ ॥

रोहणाद्रेरिवाऽऽदाय, जिनेन्द्रात्परमात्मनः ।
नानाभिधान-रत्नानि, विदग्धैर्व्यवहारिभिः ॥ ३५ ॥

सुवर्णभूषणान्याशु, कृत्वा स्व-स्व-मतेष्वथ । 5
तत्तद्देवेष्वाहितानि, कालात् तन्नामतामगुः ॥ ३६ ॥ युग्मम् ॥

यद्वा—

अमृतानि यथाऽब्दस्य, तडागादिषु पाततः ।
तज्जन्मानि जनाः प्राहुर्नामान्येवं तथाऽर्हतः ॥ ३७ ॥

लोकाग्रमधिरूढस्य, निलीनानि हरादिषु । 10
तेषां सत्कानि गीयन्ते, लोकैः प्रायो बहिर्मुखैः ॥ ३८ ॥ युग्मम् ॥

किञ्च तान्येव नामानि, विद्धि योगीन्द्र-वल्लभम् ।
यानि लोकोत्तरं सत्त्वं, ख्यापयन्ति प्रमाणतः ॥ ३९ ॥

संज्ञा रजस्तमःसत्त्वाभासोत्था अतिकोटयः ।
अनन्ते भववासेऽस्मिन्, मादृशामपि जज्ञिरे ॥ ४० ॥ 15

— —

बुद्ध अने महादेव वगेरे लौकिक देवोने सत्त्व, रजस् अने तमस् ए त्रण गुणना विषयवाळुं ज ज्ञान छे परन्तु लोकोत्तर सत्त्वथी उत्पन्न थवावाळुं सर्वज्ञान तो मात्र जिनेश्वरोने विषे ज रहेलुं छे ॥ ३४ ॥

रोहणाचल पर्वतना जेवा जिनेश्वर परमात्मा पासेथी विविध नामरूपी रत्नो लईने पंडितोरूपी वेपारीओए शीघ्र सारा वर्णवाळा नामरूपी आभूषणो बनावी पोतपोताना मानेला हरिहरादिक देवोने 20 विषे स्थापन कर्या तेथी ते सारा वर्णवाळा नामो कालान्तरे ते ते देवोना नामथी प्रसिद्ध थया छे ॥ ३५-३६ ॥

जेम वरसादनुं जळ ज तळाव वगेरेमां पडयुं होय छे, तो पण लोको कहे छे के 'आ पाणी तळावमां उत्पन्न थयुं छे' ते ज प्रमाणे लोकाग्र उपर आरूढ थयेला अरिहंतना ज पर्यायवाची नामो हरिहरादिकने विषे छे, छतां ते नामो हरिहरादिकनां छे एम अज्ञानी लोको बोले छे ॥ ३७-३८ ॥ 25

वळी, जे नामो प्रमाणथी लोकोत्तर सत्त्वने कहेनारां छे, ते ज नामो योगीन्द्रोने प्रिय एवा अरिहंतने जणावे छे, एम तुं जाण ॥ ३९ ॥

सत्त्व, रजस् अने तमोगुणना आभासथी उत्पन्न थयेलां करोडोथी पण वधारे नामो तो मारा जेवाने पण आ अनंत संसारमां प्राप्त थयां छे ॥ ४० ॥

अपि नाम सहस्रेण, मूढो हृष्टः स्वदैवते ।
बदरेणापि हि भवेत्, शृगालस्य महो महान् ॥ ४१ ॥
सिद्धानन्त-गुणत्वेनानन्तनाम्नो जिनेशितुः ।
निर्गुणत्वादनाम्नो वा, नाम-संख्यां करोतु कः ? ॥ ४२ ॥
5 रजस्तमोबहिःसत्त्वातीतस्य परमेष्ठिनः ।
प्रभावेण तमःपङ्के, विश्वमेतन्न मज्जति ॥ ४३ ॥
मन्येऽत्र लोकनाथेन, लोकाग्रं गच्छताऽर्हता ।
मुक्तं पापाज्जगत्त्रातुं, पुण्य(ण्यं)वल्लभमप्यहो ! ॥ ४४ ॥
पापं नष्टं भवारण्ये, समिति-प्रयतात् प्रभोः ।
10 तद्ध्वंसाय ततः पुण्यं, सर्वं सैन्यमिवान्वगात् ॥ ४५ ॥
पुण्य-पापविनिर्मुक्तस्तेनासौ भगवान् जिनः ।
लोकाग्रं सौधमारूढो, रमते मुक्ति-कान्तया ॥ ४६ ॥
जिनो दाता जिनो भोक्ता, जिनः सर्वमिदं जगत् ।
जिनो जयति सर्वत्र, यो जिनः सोऽहमेव च ॥ ४७ ॥
15 इति ध्यान-रसावेशात्, तन्मयीभावमीयुषः ।
परत्रेह च निर्विघ्नं, वृणुते सकलाः श्रियः ॥ ४८ ॥

इति सप्तमः प्रकाशः समाप्तः ॥

पोताना देवनां हजार नाम साभळीने मूढ माणस हर्षित थाय छे, केमके शियाळने तो बोर मळवाथी पण मोटो उत्सव थाय छे ॥ ४१ ॥

20 श्री जिनेश्वरमां अनंत गुणो सिद्ध होवाथी तेमनां अनंत नामो छे, अथवा तो निर्गुण (सत्त्वादि गुण रहित) होवाथी तेमने नाम ज नथी, तो नामनी संख्या कोण करे ? ॥ ४२ ॥

रजोगुण, तमोगुण अने बाह्य-सत्त्वगुणथी रहित एवा परमेष्ठीना प्रभावथी ज आ जगत् अज्ञानरूपी कादवमां डूबी जतुं नथी ॥ ४३ ॥

मने एम लागे छे के लोकना अग्रभागे जता त्रण लोकना नाथ श्री अरिहंत परमात्मा जगतना 25 जीवोने पापथी बचाववा माटे वल्लभ एवा पुण्यने पण अहीं ज मूकी गया ॥ ४४ ॥

समितिमां प्रयत एवा प्रभु पासेथी पाप भवरूपी अरण्यमां नासी गयुं! तेथी तेनो नाश करवा माटे समग्र पुण्य पण सैन्यनी जेम तेनी पाछळ पड्युं! ए रीते पुण्य-पाप बंनेथी विनिर्मुक्त जिनेश्वर देव लोकाग्ररूपी महेलमां आरूढ थई मुक्ति रूपी कान्ता साथे क्रीडा करे छे ॥ ४५-४६ ॥

जिन दाता छे, जिन भोक्ता छे, आ सर्व जगत् जिन छे, जिन सर्वत्र जय पामे छे अने जे 30 जिन छे, ते ज हुं छुं। ए प्रमाणे ध्यानरसना आवेशथी पंचपरमेष्ठिमां तन्मयपणाने पामेला भव्य प्राणीओ आ लोक अने परलोकमां निर्विघ्नपणे सकल लक्ष्मीने पामे छे ॥ ४७-४८ ॥

[अष्टमः प्रकाशः]

अर्हतामपि मान्यानां, परिक्षीणाष्ट-कर्मणाम् ।
सन्तः पञ्चदशभिदां, सिद्धानां न स्मरन्ति के ? ॥ १ ॥
निरञ्जनाश्चिदानन्दरूपा रूपादि-वर्जिताः ।
स्वभाव-प्राप्त-लोकाग्राः, सिद्धानन्त-चतुष्टयाः ॥ २ ॥ 5
साद्यनन्त-स्थितिजुषो, गुणैकत्रिंशताऽन्विताः ।
परमेशाः परात्मानः, सिद्धा मे शरणं सदा ॥ ३ ॥
शरणं मे गणधराः, षट्त्रिंशद्गुण-भूषिताः ।
सर्व-सूत्रोपदेष्टारो, वाचकाः शरणं मम ॥ ४ ॥
लीना दशविधे धर्मे, सदा सामायिके स्थिराः । 10
रत्नत्रय-धरा धीराः, शरणं मे[1] सुसाधवः ॥ ५ ॥
भव-स्थिति-ध्वंसकृतां, शम्भूनामिव नान्तरम् ।
सूरि-वाचक-साधूनां, तत्त्वतो दृष्टमागमे ॥ ६ ॥
धर्मो मे केवलज्ञानि-प्रणीतः शरणं परम् ।
चराचरस्य जगतो, य आधारः प्रकीर्त्तितः ॥ ७ ॥ 15

आठमो प्रकाश

अरिहंतोने पण माननीय तथा जेमना आठे कर्मो क्षीण थई गयां छे, एवा पंदर प्रकारना सिद्धोनु कया सत्पुरुषो स्मरण नथी करता ? ॥ १ ॥

कर्मना लेप विनाना, चिदानंद स्वरूप, रूपादिथी रहित, स्वभावथी ज लोकना अग्रभागने पामेला, सिद्ध थयेल छे अनन्त चतुष्टय जेमने एवा, सादि-अनन्त स्थितिवाळा, एकत्रीश गुणोवाळा, 20 परमेश्वररूप अने परमात्मस्वरूप श्री सिद्ध भगवंतोनु निरंतर मने शरण हो ॥ २-३ ॥

छत्रीश गुणो वडे शोभता श्री गणधर(आचार्य)भगवंतोनुं मने शरण हो । सर्व सूत्रोना उपदेशक श्री उपाध्याय भगवंतोनु मने शरण हो ॥ ४ ॥

क्षमादि दश प्रकारना धर्ममां लीन थयेला, सामायिकमां सदा स्थिर, ज्ञानादिक त्रण रत्नने धारण करनारा तथा धीर एवा श्री साधु भगवंतोनुं मने शरण हो ॥ ५ ॥ 25

आगमोमां जेम भवस्थितिनो ध्वंस करनारा श्री सिद्ध-भगवंतोमां परस्पर भेद जोवायो नथी, तेम भवस्थितिना ध्वंसमां उद्यमशील एवा आचार्य, उपाध्याय अने साधु वच्चे पण परमार्थथी भेद नथी ॥ ६ ॥

जे चराचर जगतनो आधारभूत कहेलो छे एवो केवलि-भाषित धर्म मने परम शरण हो ॥ ७ ॥

१. मेऽस्तु सा. ख. ग. हि. ।

ज्ञान-दर्शन-चारित्र-त्रयी-त्रिपथगोर्मिभिः ।
भुवन-त्रय-पावित्र्य-करो धर्मो हिमालयः ॥ ८ ॥
नानादृष्टान्त-हेतूक्ति-विचार-भर-बन्धुरे ।
स्याद्वाद-तत्त्वे लीनोऽहं, भग्नैकान्तमत-स्थितौ ॥ ९ ॥
5 नवतत्त्व-सुधा-कुण्डगर्भो गाम्भीर्य-मन्दिरम् ।
अयं सर्वज्ञ-सिद्धान्तः, पातालं प्रतिभाति मे ॥ १० ॥
सर्व-ज्योतिष्मतां मान्यो, मध्यस्थ-पदमाश्रितः ।
रत्नाकरावृतोऽनन्तालोकः श्रीमान् जिनागमः ॥ ११ ॥
स्थानं सुमनसामेकं स्थास्नुर्लोकद्वयोरपि ।
10 विनिद्र-शाश्वत-ज्योतिर्भाति गौः परमेष्ठिनः ॥ १२ ॥
श्रीधर्मभूमीश्वर-राजधानी, दुष्कर्म-पाथोज-वनी-हिमानी ।
सन्देह-सन्दोह-लता-कृपाणी, श्रेयांसि पुष्णातु जिनेन्द्र-वाणी ॥ १३ ॥
एवं नमस्कृति-ध्यान-सिन्धु-मग्नान्तरात्मनः ।
आममृत्कुम्भवत्सर्व-कर्मग्रन्थिर्विलीयते ॥ १४ ॥

15 धर्मरूपी हिमालय पर्वत ज्ञान, दर्शन अने चारित्र ए रत्नत्रयीरूप गंगा नदीना तरंगो वडे त्रण भुवनने पवित्र करनारो छे ॥ ८ ॥

विविध प्रकारना दृष्टान्तो, हेतुओ, सुवचनो अने सुंदर विचारणाओना समूहथी मनोहर अने भग्न कराई छे एकान्त मतोनी स्थिति जेना वडे एवा स्याद्वाद तत्त्वमा हु लीन थयो छु ॥ ९ ॥

नवतत्त्वरूपी अमृतनो कुंड जेना गर्भमां छे एवो अने गाभीर्यना मन्दिर समान आ सर्वज्ञ 20 सिद्धान्त मने पाताल जेवो ऊडो प्रतिभासे छे ॥ १० ॥

मध्यस्थ (रागद्वेषरहित) भावने आश्रित होवाथी, सुवचनरूप रत्नोनी खाणोथी व्याप्त होवाथी अने अनंत प्रकाशवाळो होवाथी श्री जिनागम सर्व बुद्धिमान पुरुषोने मान्य छे ॥ ॥ ११ ॥

पवित्र मनवाळा पुरुषोनो एकमेव आधार, बन्ने लोकमा स्थायी अने विकस्वर शाश्वत ज्योतिरूप श्री जिनवाणी शोभे छे ॥ १२ ॥

25 श्री धर्मरूपी राजानी राजधानीरूप, दुष्कर्मोरूपी कमळना वनने बाळी नाखवामा हिमना समूहरूप अने संदेहना समूहरूप लताने छेदवामा कुहाडी समान जिनेश्वरनी वाणी अमारा कल्याणनु पोषण करो ॥ १३ ॥

आ प्रमाणे नमस्कारना ध्यानरूप समुद्रमा जेनो अंतरात्मा मग्न थयेलो छे, तेनी बधी कर्मरूपी गांठो काचा माटीना घडानी जेम विलय पामे छे ॥ १४ ॥

30 १. द्वयोपरि क. ग. घ. हि. ।

श्री-ह्री-धृति-कीर्त्ति-बुद्धि-लक्ष्मी-लीला-प्रकाशकः ।
जीयात् पञ्च-नमस्कारः, स्वःसाम्राज्य-शिवप्रदः ॥ १५ ॥
'सिद्धसेन'-सरस्वत्या, सरस्वत्यापगातटे ।
'श्रीसिद्धचक्र(नमस्कार) माहात्म्यं,' गीतं श्रीसिद्धपत्तने ॥ १६ ॥

इति श्रीसिद्धसेनाचार्यविरचिते श्रीनमस्कारमाहात्म्ये अष्टमः प्रकाशः समाप्तः ॥ 5

श्री, ह्री, धृति, कीर्ति, बुद्धि अने लक्ष्मीनी लीलाने प्रकाश करनार (आपनार) तथा स्वर्गनुं साम्राज्य अने मोक्षने आपनार पंच-नमस्कार मत्र निरतर जयवत रहो ॥ १५ ॥

श्री सरस्वती नदीने काठे आवेल श्री सिद्धपुर नगरमां श्री सिद्धसेनसूरिनी वाणीए आ श्री सिद्धचक्रनुं (नमस्कारनु) माहात्म्य गायु छे ॥ १६ ॥

परिचय

10

श्री 'नमस्कार माहात्म्य'नी एक पुस्तिका श्री केसरबाई ज्ञानमंदिर, पाटण, तरफथी प्रकाशित थयेली छे। तेमा मूल अने भावार्थ बने छे। तेनु संपादन प. पू. पं. श्री कान्तिविजयजी गणिवरे करेल छे। ए पुस्तिकाने सामे राखीने प्रस्तुत संदर्भ तैयार करेल छे।

आ कृतिना रचयिता श्री सिद्धसेनसूरि छे। तेओ अंतिम श्लोकमा कहे छे के "सरस्वती नदीना तीरे सिद्धपत्तन (सिद्धपूर-पाटण) नगरमां आ 'नमस्कार माहात्म्य' श्री सिद्धसेनसूरिनी वाणीए गायुं हतुं।" 15

आ ग्रथनी रचना स्वय कही आपे छे के तेना निर्माता कोई महान ज्योतिर्धर महापुरुष होवा जोईए, ते विना आवी श्रद्धारसनी महानदी समी आ कृतिनो प्रभव अशक्य छे। साहित्य, अध्यात्म, योग वगेरेनी दृष्टिए आ रचना स्वय परिपूर्ण भासे छे।

आ ग्रथना कर्ता विषे अधिक जाणवामां आव्यु नथी। संभव छे के आ सिद्धसेनसूरि ते सिद्धसेन दिवाकर अथवा श्री तत्त्वार्थाधिगमसूत्रनी 'सिद्धसेनी' टीकाना कर्ता श्री सिद्धसेनाचार्य होवा जोईए। 20

जाणे अष्टकर्मने छेदवा माटे ज न बनाव्या होय एवा आठ प्रकाशोमा आ कृति रचायेली छे। प्रथम प्रकाशमां ग्रंथनुं मगल अने नवकारनु प्रथम पद, द्वितीय प्रकाशमां द्वितीयपद, तृतीयमां तृतीय, चतुर्थमां चतुर्थ अने पचममा पचमपद गवायु छे। अतिम चार प्रकाशोमां नवकारने लगता अन्य सर्व विषयोने संक्षेपवामां आव्या छे।

आ कृतिनी अनेक विशेषताओ छे। तेमानी एक विशेषता ए छे के नवकारना प्रथम ३५ 25 अक्षरोमांना प्रत्येक अक्षर पर ए कृतिमां स्वतत्र चिंतन छे।

नमस्कार-मंत्रने संक्षेपमा जाणवा इच्छनाराओ माटे आ कृति अत्यंत उपयोगी छे।

[६०-१५]

श्रीजिनप्रभसूरिरचिता

पञ्चनमस्कृतिस्तुतिः

[अनुष्टुप् छन्दः]

प्रतिष्ठितं तमःपारे, पारेवाग्वर्त्तिवैभवम् ।
प्रपञ्चं वेधसः 'पञ्च-नमस्कार'मभिष्टुमः ॥ १ ॥
अहो! पञ्चनमस्कारः, कोऽप्युदारो जगत्सु यः ।
सम्पदोऽष्टौ स्वयं धत्ते, दत्तेऽनन्ताः[1] स्तुतः सताम् ॥ २ ॥
दत्तेऽनुकूल एवान्यो, भुक्तिमात्रमपि प्रभुः ।
एष पञ्चनमस्कारः, प्रतिलोम्येऽपि[2] मुक्तिदः[3] ॥ ३ ॥
नमस्कारनरेन्द्रस्य, किमपि प्राभवं[4] स्तुमः ।
यदीयफूत्कृतेनाऽपि, विद्रवन्ति द्विषः क्षणात् ॥ ४ ॥
सिद्धयोऽप्यणिमाद्यास्ता, नमस्कारमधिष्ठिताः ।
सप्तषष्ट्यक्षरात्माऽपि[5], यदसौ प्रणवेऽविशत् ॥ ५ ॥

अनुवाद

अंधकारनी पेले पार रहेला (प्रकाशरूप), वाणीमां रहेली शक्तिथी पर (एटले—जेनुं वर्णन करवामां वाणी असमर्थ छे) अने ब्रह्म(ज्ञान)ना विस्ताररूप (?) पंच-नमस्कारनी अमे स्तुति करीए छीए ॥ १ ॥

अहो ! (आ) पंचनमस्कार त्रण जगतमां कोई अद्वितीय उदार छे, जे स्वयं आठ संपदाओ (विश्राम-स्थानो) ने धारण करे छे, (पण) स्तुति करायेलो ते (पच-नमस्कार) सज्जनोने अनन्त संपदाओ आपे छे ॥ २ ॥

बीजो स्वामी अनुकूल (प्रसन्न) थाय तो ज केवळ भुक्ति-भोग मात्रने आपे छे। (ज्यारे) आ पंच-नमस्कार प्रतिलोमे (व्युत्क्रमथी---पश्चानुपूर्वीथी गणवा छता) पण मुक्तिने आपनार छे ॥ ३ ॥

नमस्काररूपी महाराजाना महिमानुं अमे केटलुं वर्णन करीए के (नमस्कार नरेन्द्रना ते अनिर्वचनीय महिमाने अमे स्तवीए छीए के) जेना फूत्कारमात्रथी शत्रुओ एक क्षणमां नाश पामे छे ॥ ४ ॥

ते (अत्यन्त विख्यात) अणिमादि (आठ) सिद्धिओ पण नमस्कार(मंत्र)मां अधिष्ठित छे। तेथी सड(अड)सठ अक्षरवाळो होवा छतां पण आ मंत्र प्रणव-ओंकारमां समाई गयो छे ॥ ५ ॥

१. °नन्तास्तु ताः सताम् J । २. °लोम्योऽपि H । ३. बन्धमोक्षमित्याम्नायः । ४. माहात्म्यम् । ५. अष्टषष्ट्य° J ।

शिरस्त्रादिधिया धीरैः, स्वाङ्गदेशनिवेशिता[६] ।
नमस्कृतेर्नवपदी, कटरे(?) वज्रपञ्जरः ॥ ६ ॥
वर्ण्यतां श्रीनमस्कारात्, कार्मणं किमतोऽधिकम् ? ।
यत्सम्प्रयोगतः पांशुरपि संवनयेज्जगत् ॥ ७ ॥
नमस्कारं स्तुमः सिद्धं, यत्पदस्पर्शपूतया । 5
प्रत्याच्छादितसर्वाङ्गः, शान्तिमासादयेज्ज्वरी ॥ ८ ॥
नववर्णीं नमस्कृत्य, कृती प्रतिपदं जपेत् ।
विधत्ते विविधाऽनिघ्नविघ्नाऽविग्रहनिग्रहम् ॥ ९ ॥
कर्णिकाष्टदलाढ्ये हृत्पुण्डरीके निवेश्य यः ।
ध्यायेत् पञ्चनमस्कारं, संसारं सन्तरेत्तराम् ॥ १० ॥ 10

धीर-पुरुषोए नमस्कारना नव पदो (वज्रपंजर-स्तोत्रमा बताव्या मुजब) शिरस्त्राण वगेरेनी बुद्धिथी पोताना शरीरना जुदा जुदा भागोमा स्थापेला छे । आनी आगळ वज्रनुं पाजरुं पण शुं (शा कामनु) ?

(आ रीते पण न्यास करी शकाय:—प्रथम पद 'नमो अरिहताण' बोलतां मस्तक परनी चोटलीना भाग उपर हाथ फेरववो, ए ज प्रमाणे—बीजु पद बोलतां कपाळ उपर, त्रीजुं पद बोलता जमणा काने, चोथु पद बोलता ग्वाडो-आख उपर, पाचमु पद बोलता जमणा कानने, छट्ठु पद बोलता जमणा 15 शखे--ललाटना जमणा खुणामां अने बाकीना पदो वखते शेप विदिशाओमा हाथ फेरववो) ॥ ६ ॥

कहो, श्रीनमस्कार (मत्र) थी वधीने बीजु कयु मोटुं कामण छे ? जेना विधिपूर्वक सयोगथी धूळ पण जगतने वश करी शके छे (अर्थात नमस्कार-मंत्रना सयोगथी सिद्ध करेली धूळमा पण विश्वने वशीकरण करवानु सामर्थ्य छे) ॥ ७ ॥

ते सिद्धनमस्कारनी अमे स्तुति करीए छीए (मत्रोद्धार—"नम. सिद्धम।") के जे मत्रना पद- 20 स्पर्शथी पवित्र थयेली कामळवडे (पोतानां) सर्व-शरीरने ढाकी देनार तावबाळो (माणस) शातिने पामे छे । (अर्थात सिद्ध नमस्कार गणीने ओढेला वस्त्रथी गमे तेवो ताव शांत थाय छे) ॥ ८ ॥

नववर्णी–'नमो लोए सव्व साहूण' पदने नमस्कार करीने ए पदरूप मत्रने पगले पगले (प्रतिक्षण) जपतो एवो धर्मी (पुण्यवान) पुरुष आवनारा विघ्नोने विग्रह (लडाई) विना सहेलाईथी रोकी शके छे (?) ॥ ९ ॥ 25

कर्णिका सहित आठ पत्रवाळा हृदय-कमळमा पचनमस्कार (ना नवपद) ने स्थापन करीने जे ध्यान करे ते संसारने शीघ्रतः तरी जाय छे ॥ १० ॥

६. प्रथमं पदं शिखायाम्, द्वितीयं भाले, तृतीयं दक्षिणकर्णोपरि, चतुर्थमवटौ, पञ्चमं सव्यश्रवणे षष्ठं दक्षिणशङ्खे—इत्यादिदिक्षु ।

७. संयोगतः वालुकाऽपि वशीकुरुते । ८. नुमः J । ९. सुधीः J । १०. स तरेत्तराम् । 30

सप्तषष्टि-पदैर्वश्ये, वर्णमालिख्यते च यत् ।
क्रमादावर्चयन् सम्यगेति शातैः(शान्ते)र्निशान्तताम् ॥ ११ ॥
आद्याक्षराण्यपीष्टार्थसिद्धयै स्युः परमेष्ठिनाम् ।
बिन्दुरप्यमृत(तं) किं न, नाशयेद् विषविक्रियाम् ॥ १२ ॥
5 कराङ्गुलीषु विन्यस्यार्हदादीन् ध्यानमानयन् ।
प्रत्यूहपन्नगव्यूहव्यपोहे गरुडायते ॥ १३ ॥
गुरून् पञ्च क्रमाद् ध्यायन्, मुद्रया परमेष्ठिनाम् ।
गूढप्ररूढमचिरात् कर्मग्रन्थिं विमोचयेत् ॥ १४ ॥
षोडशाक्षरमानूँ(?) श्रद्धापरमः परमेष्ठिनाम् ।
10 प्राणी प्रणिदधानोऽप्युपवासफलमेधते ॥ १५ ॥

नमस्कार महामन्त्र—सड(अड)सठ अक्षरो अथवा पदो वश्यादिने उद्देशीने जे (रक्तादि) वर्णमां आलेखवामां आवे ते वर्ण मुजब वश्यादि कृत्य थाय छे। वशीकरण द्वारा वश बनीने ते पग वगेरेने पूजतो आवे छे (आवीने पगे पडे छे) अने शान्तिनु धाम बनी जाय छे—शान्त बनी जाय छे॥ ११ ॥

परमेष्ठिओना प्रारभना अक्षरो (एटले अरिहंतनो **अ**, सिद्धनो **सि**, आचार्यनो **आ**, उपाध्यायनो 15 **उ** अने साधुनो **सा**—**असिआउसा**) पण इच्छित वस्तुनी प्राप्ति माटे थाय छे। शु बिन्दु (जेटलुं) पण अमृत झेरनी विक्रियानो नाश नथी करतु ? अर्थात् करे ज छे ॥ १२ ॥

पांचे पदो बोलतां क्रमशः बन्ने अंगूठा वगेरेना संयोगथी अरिहंतादिनुं करागुलीओमा न्यास करीने अरिहतादिनु ध्यान करतो पुण्यात्मा विघ्नरूप सर्पसमूहने विषे गरुडरूप थाय छे ॥ १३ ॥

परमेष्ठिमुद्रावडे अनुक्रमे पाच (अरिहतादि) गुरुओनु ध्यान करतो (आत्मा) गूढ अने वधेली (दृढ 20 मूलवाळी) कर्मग्रन्थिने शीघ्र छोडी नाखे छे। (मत्रशास्त्रनी दृष्टिए १०८ जापथी बीजाए करेल कामणरूप ग्रंथि—बन्धनने छोडी नाखे छे) ॥ १४ ॥

अत्यन्त श्रद्धावाळो आत्मा परमेष्ठिओना सोळ अक्षरवाळा (अ—रि—ह—त—सि—द्ध—आ—य—रि—य—उ—व—ज्झा—य—सा—हु) मंत्रनुं ध्यान करवाथी एक उपवासना फळने पामे छे* ॥ १५ ॥

---

११. °षष्टी पदे° J। १२. कोष्ठकेषु।

25 १३. पञ्चस्वपि पदेषु क्रमेणाङ्गुष्ठद्वयादिसंयोगः। १४. विघ्न°। १५. °नैव तीर्यते। १६. १०८ जापेन परकृतदुष्टकार्मणग्रन्थिभेदः। १७. 'अरिहंत-सिद्ध-आयरिय-उवज्झाय-साहु' इत्यक्षराण्यष्टदलकमले सकर्णिके नवपदीं जपन् वा चतुर्थफलमश्नुते। शतानि त्रीणि षड्वर्णं (अरिहंत सिद्ध) चत्वारि चतुरक्षरं (अरिहंत)पञ्च(अऽ)वर्णं जपन् योगी चतुर्थफलमश्नुते। १८. °नोऽप्यौपवस्त्रफल° J।

* अर्थात् बसो वार ए सोळ अक्षरोने कर्णिकासहित एवा कमळमा अरिहंतादि नवपदोने स्थापीने अथवा त्रणसो 30 वार छ वर्णवाळो 'अरिहत सिद्ध' एवो मंत्र, अथवा चारसो वार चार वर्णवाळो 'अरिहंत' एवो मत्र, अथवा पाचसो वार 'अ(ऽ)' वर्णने जपतो योगी एक उपवासनु फळ मेळवे छे। आ तो स्थूळ फळ छे, खरी रीते तो ते स्वर्ग के अपवर्गने पण पामे छे।

विद्युंजलाग्निभूपाल-व्याल-चौरारि-मारिजम् ।
भयं वञ्चयते पञ्चनमस्कारं च संस्मरन् ॥ १६ ॥
आराध्य विधिवत् पञ्चनमस्कारमुदारधीः ।
लक्षजापेन पापेन, मुक्तं आर्हन्त्यमश्नुते ॥ १७ ॥
ऐहिकं फलमीप्सूनामष्टकर्म्मप्रसाधिनी । 5
मुक्त्यर्थिनां च स्यादेषैवाष्टकर्म्मनिषेधिनी ॥ १८ ॥

पच-नमस्कारने सारी रीते स्मरण करनारो वीजळी, पाणी, अग्नि, राजा, हिंसक पशु, चोर, शत्रु अने मरकीथी उत्पन्न थता भयने दूर करे छे (अर्थात्—

'थमेइ जल जलण चिंतिय मित्तो वि पचनवकारो।
अरि-मारि-चोर-राउल-घोरुवसग्ग [अमुगस्स मम वा] पणासेइ ॥ स्वाहा ॥' 10

आ मंत्रने चदनकर्पूरवडे लींपेली भूमि पर मूकेली (?) एक वही उपर लखवो। तेना नीचे अरिहत वगेरे पाच टिक्किका-चिह्नो करीने पछी प्रथम नवकारनु स्मरण करवु अने ते पछी 'थमेइ०' गाथानो प्रतिदिन १०८ वारनो अक्षतवडे जाप २१ दिवस करता ए प्रकारना भयो नडता नथी।) ॥ १६

उदार बुद्धिवाळो पुरुष विधिपूर्वक एक लाख जापथी पच-नमस्कारनी आराधना करे तो पापथी मुक्त बनी तीर्थंकरपणाने पामे छे ॥ १७ ॥ 15

आ (पच नमस्कृति) सांसारिक फळोने चाहनाराओना आठ *कर्मोने सिद्ध करनारी अने मोक्षाभिलाषीओना (ज्ञानावरणादि) आठ कर्मोने नाश करनारी छे ज ॥ १८ ॥

सरखावो — **गुरुपंचकनामोत्था विद्या स्यात् षोडशाक्षरी ।**
जपन् शतद्वयं तस्याश्चतुर्थस्याप्नुयात्फलम् ॥ ३९ ॥
शतानि त्रीणि षड्वर्णं चत्वारि चतुरक्षर । 20
पञ्चवर्णं जपन् योगी चतुर्थफलमश्नुते ॥ ४० ॥
प्रवृत्तिहेतुरेवैतदमीषां कथितं फलम् ।
फलं स्वर्गापवर्गौ तु वदन्ति परमार्थतः ॥ ४१ ॥

—श्रीमद् हेमचन्द्राचार्यविरचित योगशास्त्रे अष्टमः प्रकाशः ।

१९. **ॐ थंभेइ य (जलं) जलण चिंतियमित्तोवि पचनवकारो। अरि-मारि-चोर-राउल-घोरुवसग्गं** 25 **[अमुगस्स मम वा] पणासेइ। स्वाहा॥ एतत्कर्पूरचन्दनेनैकस्या मौल्यां वहिकापट्टे लिखित्वा अधष्टिक्किकापञ्च-कमर्हदादीनां कृत्वाऽऽद्यौ नमस्कारं स्मृत्वा, तत "ॐ थंभेइ" इत्यादि १०८ तन्दुलैर्जपः कर्त्तव्यः दिनानि २१ यावत्।**
२०. °स्कारस्य स° J ।

२१. मुक्तमार्ह° J । २२. °प्रसाधनी H । २३. **शान्तिक-पौष्टिक-विद्वेषण-मोहनोच्चाटन-मारण-वश्य-स्तम्भनाख्यानि ।**

* **स्तम्भं विद्वेषमाकृष्टिं, पुष्टिं शान्तिप्रचालनम् ।** 30
वश्यं वधं च तं कुर्यात्, पूर्वाद्याभिमुखः क्रमात् ॥ २ ॥

—विद्यानुशासन (हस्तलिखित) पृष्ठ २०.

१ स्तम्भन, २ विद्वेषण, ३ आकर्षण, ४ पुष्टि, ५ शान्ति, ६ उच्चाटन, ७ वश्य अने ८ मारण आ आठ कर्म छे।

विपदामभिचारस्योपादानस्याखिलश्रियाम् ।
स्मर्ता नमस्कृतेः स्वर्गिवर्गेण वरिवस्यते ॥ १९ ॥

चतुर्दशानां पूर्वाणामेषो[24]ऽस्त्युपनिषत् परा ।
आद्या सकलविद्यानां, बीजानां प्रकृतिः परा ॥ २० ॥

[25]इदं पथ्य[26]दनं पथ्यं, परलोकाध्वयायिनाम् ।
परमाऽस्त्रं नृणां मोहराजयुद्धाय सज्जताम् ॥ २१ ॥

प्राणी प्राणप्रयाणस्य, क्षणे ध्यायन् नमस्क्रियाम् ।
लभते सुगती[27]र्नैकाः, पाप्मा न स्तुतपूर्व्यपि ॥ २२ ॥

नमस्कृतिं कृपा[28]चित्तैः, श्रोत्रयोः प्राभृतीकृताः ।
स्वीकृत्य पुण्य[29]सन्ध्यां च, तिर्यञ्चोऽपि ययुर्दिवम् ॥ २३ ॥

त्रिदण्डिनं निगृह्याऽसियष्टिना 'श्रेष्ठिनन्दनः' ।
नमस्कारस्य महसा[30]ऽसाधयत् स्वर्णपुरुषम् ॥ २४ ॥

विपत्तिओने दूर करवा माटे अभिचारमन्त्रप्रयोगरूप अने समग्र संपत्तिओना उपादान-मूळकारणरूप नमस्कारनुं स्मरण करनार देव-समूहवडे पूजाय छे ॥ १९ ॥

आ (नमस्कार) चौद पूर्वोना परम साररूप छे, समस्त विद्याओनु आदि कारण छे अने बीज-मंत्रोनी परा—उत्कृष्ट प्रकृति (जन्मभूमि) छे ॥ २० ॥

परलोकना मार्गे प्रयाण करनाराओने आ नमस्कार मार्गमा हितकारी एवु उत्तम भातु छे अने मोहराज साथे युद्ध करवाने सज्ज थता मनुष्योनु अमोघ अस्त्र छे ॥ २१ ॥

पहेलां जेणे स्मरण नथी कर्यु एवो पापी प्राणी पण मरण समये नमस्कार-मंत्रनु ध्यान करतो अनेक प्रकारनी सुगतिओने प्राप्त करे छे* ॥ २२ ॥

कृपाळु चित्तवाळा (सज्जनो) वडे कानमां नमस्कारनी भेट करायेला एवा तिर्यंचो पण पवित्र छे सन्ध्या (ध्यान) जेनी एवी नमस्कृतिने स्वीकारीने स्वर्गे गया ॥ २३ ॥

(शिवनामे) श्रेष्ठि-पुत्रे तलवारवडे त्रिदंडीनो निग्रह करीने नमस्कारना प्रभावथी सुवर्णपुरुषने सिद्ध कर्यो ॥ २४ ॥

२४. °मेषैवोप° J । २५. इय H । २६. पथ्योदन H ।
२७. सुगति नैकान् पाप्मनः कृतपूर्व्यपि J । २८. कृपावित्तैः J । २९. पुण्यसन्ध्यं च H । ३०. °सा साधयन् स्वर्णपौरुषम् J ।

* (पाठातर मुजब—पूर्वे जेणे अनेक पापो कर्या होय एवो प्राणी पण मरणसमये नमस्कारनु ध्यान करे तो सुगतिने पामे छे ।)

स्मृत्वा पञ्चनमस्कारं, प्रविष्टायास्तमोगृहम् ।
घटन्यस्तो 'महासत्याः', पन्नगः पुँष्पमालवत् ॥ २५ ॥
नमस्कारेण सम्बोध्य, मातुलिङ्गवनान्तरम् ।
प्राणत्राणं स्वपरयोर्व्यधत्त 'श्राद्धपुङ्गवः' ॥ २६ ॥
यक्षतां 'हुण्डिकः' प्रापत्, सुँकुलं 'चण्डपिङ्गलः' । 5
इतस्ताद्दग्गुणस्फातिं, 'सुदर्शनः' सुदर्शने ॥ २७ ॥
एष माता पिता स्वामी, गुरुर्नेत्रं भिषँक् सखा ।
प्राणस्त्राँणं मतिर्दीपः, शान्तिः पुष्टिर्महन्महः ॥ २८ ॥
निधयः सन्निधौ कामधेनुरप्यनुगाँमिका ।
भूभृतो भृतकास्तस्य, यस्य नैष हृदा हिरुक् ॥ २९ ॥ 10
नास्येयत्ता प्रभावाणां, क्रमवर्त्तितया गिरा ।
मितायुष्ट्वाच्च सर्वोऽपि, न्यक्षेण भणितुं क्षमः ॥ ३० ॥
सर्वाऽवस्थोचितं सर्वश्रुतसारं सनातनम् ।
परमेष्ठिमहामन्त्रं, भक्तितन्त्रमुपास्महे ॥ ३१ ॥

पच-नमस्कारमत्रनुं स्मरण करीने अंधारा घरमा गयेली (श्रीमती नामनी) महासतीने घडामां 15 ग्हेलो सर्प फूलनी माळा बनी गयो ॥ २५ ॥

(जिनदास नामना) उत्तम श्रावके बीजोराना वनमा व्यन्तरदेवने नमस्कारमत्रवडे प्रतिबोध करीने पोताना अने परना प्राणोनी रक्षा करी ॥ २६ ॥

नमस्कार-मंत्रना प्रभावथी हुंडिक नामनो चोर महर्धिक यक्षपणाने पाम्यो, चण्डपिंगल नामनो चोर उत्तमकुलने पाम्यो अने सुदर्शन नामना शेठ जिनमतने विषे उत्तम गुणोनी वृद्धिने पाम्या ॥ २७ ॥ 20

आ नमस्कार-मंत्र माता, पिता, स्वामी, गुरु, नेत्र, वैद्य, मित्र, प्राण, रक्षण, बुद्धि, दीपक, शान्ति, पुष्टि अने महाज्योति छे ॥ २८ ॥

जेना हृदयथी आ (नमस्कार-मंत्र) दूर नथी, तेनी पासे (नव) निधिओ रहे छे, कामधेनु पण तेनी अनुगामिनी बने छे अने राजाओ तेना नोकर थईने रहे छे ॥ २९ ॥

आ नमस्कारना प्रभावो आटला ज छे एवुं नथी। वाणी तो क्रमवर्ती छे अने आयुष्य पण 25 परिमित छे, तेथी आनो प्रभाव विस्तारथी कहेवा माटे कोई पण समर्थ नथी ॥ ३० ॥

बधी अवस्थाने योग्य, बधा शास्त्रोनां सारभूत, सनातन–शाश्वत अने भक्तिनां तंत्ररूप परमेष्ठि महामत्रनी अमे उपासना करीए छीए ॥ ३१ ॥

३१. पुष्पमाल्यभूत् J । ३२. सत्कुलं J ।
३३. पृथक् J प्रतौ पाठान्तरम् । ३४. °णं गतिर्द्दीपः J । ३५. गामुका J । 30

(शार्दूलविक्रीडित-वृत्तम्)

उच्चैर्योजनलक्षमानविदितो बिभ्रत् सुवर्णात्मतां,
भव्यानन्दनभद्र[36]शालमहिमा, रोचिष्णुचूलाञ्चितः ।
अस्तु श्रीजिन[37]गेहभास्वररुचिस्थानं लसन्निर्जरः,
5 सोऽयं वः परमेष्ठिपञ्चकनमस्कारः सुमेरुः श्रिये ॥ ३२ ॥
साम्नायावयवां जिनप्रभगुरुर्यां सूत्रयामासिवान्,
दिव्यां 'पञ्च-नमस्कृति-स्तुतिमिमामानन्दनन्दन्मनाः ।
यस्यैषाश्वति कण्ठसीमनि मदा मुक्तालताविभ्र[38]मं,
तं मुञ्चन्त्यचिरेण विघ्ननिचयाः श्लिष्यन्ति च श्रीभराः ॥ ३३ ॥

10 जे लाखो माणसोमा अत्यन्त प्रसिद्ध छे, सुदर वर्ण(अक्षर)मयताने धारण करनारो छे, भव्य पुरुषोने--मोक्षाभिलाषीओने आनद आपनारो तथा भद्रपुरुषोना शालागृह समान छे, देदीप्यमान चूलिकाथी सुशोभित छे, जे श्रीजिनेश्वर भगवानने विषे मनवाळा पुरुषोनां अतिशयवाळी रुचिनु स्थान छे अने जेमा देवताओनु अधिष्ठान छे ते आ पच-परमेष्ठि-नमस्काररूपी सुमेरु तमारा कल्याणने माटे थाओ ।
(आ श्लोकमा मेरु पर्वतना *रूपकथी नमस्कारमत्रने वर्णव्यो छे) ॥ ३२ ॥

15 आनन्दथी उल्लसित मनवाळा '**श्रीजिनप्रभसूरिए**' आम्नायना अगोवाळी दिव्य आ '**पञ्च-नमस्कृति**' नामनी स्तुतिनी रचना करी छे; मोतीना हारनी समान शोभावाळी आ पचनमस्कृति जेना कठ-प्रदेशमां सदा शोभे छे तेने विघ्नोनी परपरा शीघ्र छोडी दे छे अने लक्ष्मीना समहो भेटे छे ॥ ३३ ॥

परिचय

आ स्तुतिनी त्रण प्रतिओ मळी हती; जेमानी एक प्रति वडोदरा, श्रीहसविजयजी शास्त्रसग्रह - 20 जैनज्ञानमदिरनी प्रति न. १८६२-३ हती; बीजी मुबई, रॉयल एशियाटिक सोसायटी प्रति न. ८३३-३ हती; त्रीजी प्रति 'नमस्कारव्याख्यानटीका' ना पूर्वभागमा सग्रहरूपे आपेली हती, जेनी फोटोस्टेटिक कोपी अमारा सग्रहमां छे । ए त्रणे प्रतिओ ऊपरथी पाठ सुधारीने अही आपेल छे, छेवटे मुनि श्रीजिनविजयजीए छपावेला फॉर्म्स ऊपरथी पाठभेदो लई, तेमा छपायेली शब्दस्थलटिप्पणीनो पण अहीं समावेश कर्यो छे। आ रीते मूल, शब्द-टिप्पणी, पाठातरो अने अनुवाद साथे आ स्तोत्रने अहीं प्रगट कर्यु छे ।

25 आ स्तोत्रना कर्ता खरतरगच्छीय श्रीजिनप्रभसूरि, चौदमी सदीमां एक प्रतिभाशाळी विद्वान तरीके जैन साहित्यमां प्रसिद्धि पामेला छे । तेमणे स्तोत्रसाहित्यमा अनेक कृतिओ रची छे, तेमनी मांत्रिक तरीकेनी ख्याति पण तेमना चरितवर्णनो अने कृतिओ नोधे छे। श्रीजिनप्रभसूरिए नमस्कार विशे आ कृतिमा विशिष्ट माहिती आपी छे अने तेना आम्नायनु सूचन पण कर्युं छे । बत्रीश अनुष्टुप् छदमां आ कृति छे ।

३६. भद्राणां शालागृह भद्रशाल । ३७. जिनगा जिनविषया ईहा येषां ते, भास्वरातिशायिनी 30 रुचिर्गण्सा तस्या. स्थान विषय. ।

* मेरुना पक्षमा अर्थ .—

जे ऊचाईमा एक लाख योजन प्रमाण प्रसिद्ध छे, सुवर्णमय शरीरने धारण करनार, उत्तम पुरुषोने आनंददायी एवा भद्रशाल वनथी युक्त छे, सुशोभित शिखरवाळो छे, देदीप्यमान कान्तिवाळा श्रीजिनालयोना सुंदर स्थानरूप छे, जेमां देवताओ क्रीडा करे छे, एवो ते सुमेरु पर्वत तमारा कल्याणने माटे थाओ ॥ ३२ ॥

35 ३८. °विभ्रमा H ।

पू. मुनिश्री पुण्यविजयजीमहाराज
हस्तलिखित पाठ.

पंचमंगलमहासुयक्खंधसुत्तं

नमो अरिहंताणं
नमो सिद्धाणं
नमो आयरियाणं
नमो उवज्झायाणं
नमो लोए सव्वसाहूणं ।
एसो पंचनमुक्कारो, सव्वपावप्पणासणो ।
मंगलाणं च सव्वेसिं पढमं हवइ मंगलं ॥

श्रीजिनप्रभसूरिरचितः
पञ्चपरमेष्ठिनमस्कारस्तवः ॥

(अनुष्टुप्-वृत्तम्)

स्वःश्रियं श्रीमदर्हन्तः, सिद्धाः सिद्धपुरीपदम् । 5
आचार्याः पञ्चधाचारं, वाचका वाचनां वराम् ॥ १ ॥
साधवः सिद्धि-साहाय्यं, वितन्वन्तु विवेकिनाम् ।
मङ्गलानां च सर्वेषां, प्रथमं भवति मङ्गलम् ॥ २ ॥
अर्हमित्यक्षरं माया-बीजं च प्रणवाक्षरम् ।
एवं ज्ञानस्वरूपेण, ध्येयं ध्यायन्ति योगिनः ॥ ३ ॥ 10
हृत्पद्मं षोडशदलं, स्थापितं षोडशाक्षरम् ।
परमेष्ठिस्थितं बीजं, ध्यायेदक्षरदं मुदा ॥ ४ ॥
मन्त्राणामादिमं मन्त्रं, तन्त्रं विघ्नौघनिग्रहम् ।
ये स्मरन्ति सदैवैनं, ते भवन्ति 'जिनप्रभाः' ॥ ५ ॥

अनुवाद 15

विवेकी पुरुषोने श्री अरिहंतो स्वर्गनी लक्ष्मी, सिद्धो सिद्धपद, आचार्यो पांच प्रकारनो आचार उपाध्यायो श्रेष्ठ शास्त्रज्ञान अने साधुओ सिद्धिमां (मोक्षमार्गमां) मदद आपो । ए पांच परमेष्ठिओने करायेल नमस्कार सर्व मगलोमां प्रथम मंगल छे ॥ १–२ ॥

'ॐ ह्रीँ अर्हँ' रूप ध्येयनुं योगीओ ज्ञानरूपे (?) ध्यान करे छे ॥ ३ ॥

षोडशदल हृदयकमळनी सोळ पांखडीओमां सोळ स्वरो अथवा 'अ-रि-हं-त-सि-द्ध-आ-य-रि-य-उ- 20 व-ज्झा-य-सा-हु' ए षोडशाक्षर अनुक्रमे स्थापवा । तेनी मध्यमां मोक्षदायक श्री परमेष्ठिबीज (ॐ अथवा ऽर्हँ) नुं प्रसन्नतापूर्वक ध्यान करवुं । ए बीज सर्व मंत्रोमां प्रथम मत्र छे अने विघ्नसमूहनो नाश करनार महान तंत्र पण ए ज छे । जेओ एनु सदैव ध्यान करे छे तेओ श्री जिनेश्वरनी कान्ति समान कान्तिवाळा थाय छे (अहीं 'जिनप्रभाः' पद वडे कर्ताए पोतानुं नाम पण श्लेषित कर्युं छे ।) ॥ ४–५ ॥

परिचय 25

आ स्तोत्रमां खरतरगच्छीय आचार्य श्रीजिनप्रभसूरिए पांच अनुष्टुप् श्लोकोमां पांच परमेष्ठी भगवंतोनी स्तुति करी छे । ए स्तोत्र पूना, भांडारकर रिसर्च इन्स्टिटयूटनी आदिनाथ महाप्रभावक स्तोत्र नामनी हस्तलिखित प्रति नं. $\frac{१२५०}{१८८४-८७}$ मांथी प्राप्त थयुं छे । ए स्तोत्रने अहीं अनुवाद साथे प्रकाशित कर्युं छे ॥

[६२-१७]

श्रीकमलप्रभसूरिविरचितं
जिनपञ्जरस्तोत्रम्

ॐ ह्रीँ श्रीँ अर्हँ अर्हद्भ्यो नमो नमः ।
5 ॐ ह्रीँ श्रीँ अर्हँ सिद्धेभ्यो नमो नमः ।
ॐ ह्रीँ श्रीँ अर्हँ आचार्येभ्यो नमो नमः ।
ॐ ह्रीँ श्रीँ अर्हँ उपाध्यायेभ्यो नमो नमः ।
ॐ ह्रीँ श्रीँ अर्हँ गौतम-प्रमुख-सर्वसाधुभ्यो नमो नमः ॥ १ ॥
एषः पञ्च-नमस्कारः, सर्व-पाप-क्षयङ्करः ।
10 मङ्गलानां च सर्वेषां, प्रथमं भवति मङ्गलम् ॥ २ ॥
ॐ ह्रीँ श्रीँ जये विजये, अर्हँ परमात्मने नमः ।
कमलप्रभसूरीन्द्रो, भाषते जिनपञ्जरम् ॥ ३ ॥
एकभक्तोपवासेन, त्रिकालं यः पठेदिदम् ।
मनोऽभिलषितं सर्वं, फलं स लभते ध्रुवम् ॥ ४ ॥
15 भूशय्या-ब्रह्मचर्येण, क्रोध-लोभविवर्जितः ।
देवताग्रे पवित्रात्मा, षण्मासैर्लभते फलम् ॥ ५ ॥

अनुवाद

आ पंच-नमस्कार सर्व पापोनो नाश करनार छे अने सर्व मंगलोमां प्रथम-उत्कृष्ट मंगल छे ॥ २ ॥

"ॐ ह्रीँ श्रीँ जये ! विजये ! अर्हँ परमात्मने नमः." ए मंत्र वडे परमात्माने नमस्कार करीने
20 **श्रीकमलप्रभसूरि श्रीजिनपंजर** नामना स्तोत्रने कहे छे ॥ ३ ॥

जे (मनुष्य) एकासणुं अथवा उपवास करीने त्रिकाल आ (स्तोत्र) ने भणे छे, ते निश्चय-पूर्वक सर्व मनोवांछित फलने प्राप्त करे छे ॥ ४ ॥

क्रोध अने लोभथी रहित एवो जे पवित्र पुरुष भूशय्या अने ब्रह्मचर्य वडे आ स्तोत्रनी रोज नियमित साधना करे छे ते छ महिनामां फळने पामे छे ॥ ५ ॥

अर्हन्तं स्थापयेन्मूर्ध्नि, सिद्धं चक्षुर्ललाटके ।
आचार्यं श्रोत्रयोर्मध्ये, उपाध्यायं तु नासिके ॥ ६ ॥

साधुवृन्दं मुखस्याग्रे, मनःशुद्धिं विधाय च ।
सूर्य-चन्द्रनिरोधेन, सुधीः सर्वार्थसिद्धये ॥ ७ ॥

दक्षिणे मदनद्वेषी, वामपार्श्वे स्थितो जिनः । 5
अङ्गसन्धिषु सर्वज्ञः परमेष्ठी शिवङ्करः ॥ ८ ॥

पूर्वाशां च जिनो रक्षेदाग्नेयीं विजितेन्द्रियः ।
दक्षिणाशां परं ब्रह्म, नैर्ऋतीं च त्रिकालवित् ॥ ९ ॥

पश्चिमाशां जगन्नाथो, वायव्यां परमेश्वरः ।
उत्तरां तीर्थकृत्सर्वामी(त्सार्वई)शानेऽपि निरञ्जनः ॥ १० ॥ 10

पाताल भगवानर्हन्नाकाशं पुरुषोत्तमः ।
रोहिणीप्रमुखा देव्यो, रक्षन्तु सकलं कुलम् ॥ ११ ॥

बुद्धिमान् पुरुष, सर्वार्थनी सिद्धि माटे सूर्यनाडी अने चन्द्रनाडीने रोकीने अने मननी पवित्रता करीने अरिहंतने मस्तकमा, सिद्धने ललाट पर भ्रूमध्यमा, आचार्यने बन्ने कानोनी मध्यमा, उपाध्यायने नासिका उपर अने साधुसमुदायने मुखना अग्र भाग उपर स्थापित करे ॥ ६–७ ॥ 15

श्री अरिहत परमात्मा कामनाशकरूपे दक्षिण पार्श्वनु, जिनरूपे वामपार्श्वनुं अने सर्वज्ञ, परमेष्ठी अने शिवकर रूपे अंगोना सन्धि स्थानोनुं रक्षण करो ॥ ८ ॥

श्री अरिहत परमात्मा जिनेश्वररूपे पूर्व दिशानी रक्षा करो, विजितेन्द्रिय (इन्द्रियोने जीतनार) रूपे आग्नेयी विदिशानी रक्षा करो, परब्रह्मरूपे दक्षिण-दिशानी रक्षा करो अने त्रणे काळने जाणनार रूपे नैर्ऋती विदिशानी रक्षा करो । जगन्नाथरूपे पश्चिम दिशानी रक्षा करो, परमेश्वररूपे वायव्य विदिशानी 20 रक्षा करो, तीर्थंकर अने सार्वरूपे उत्तरदिशानी रक्षा करो अने निरजनरूपे ईशान विदिशानी रक्षा करो, भगवान अरिहंतरूपे पातालनी रक्षा करो अने पुरुषोत्तमरूपे आकाशनी रक्षा करो । रोहिणी वगेरे देवीओ समग्र कुलनुं रक्षण करो ॥ ९–१०–११ ॥

१. मुखाग्रेऽपि, S । २. न सर्वार्थं साधयेत् सुधीः S ।

ऋषभो मस्तकं रक्षेदजितोऽपि विलोचने ।
सम्भवः कर्णयुगलेऽभिनन्दनस्तु नासिके ॥ १२ ॥
ओष्ठौ श्रीसुमती रक्षेद् , दन्तान् पद्मप्रभो विभुः ।
जिह्वां सुपार्श्वदेवोऽयं, तालुं चन्द्रप्रभाभिधः ॥ १३ ॥
5 कण्ठं श्रीसुविधी रक्षेद्, हृदयं श्रीसुशीतलः ।
श्रेयांसो बाहुयुगलं, वासुपूज्यः करद्वयम् ॥ १४ ॥
अङ्गुलीर्विमलो रक्षेदनन्तोऽसौ नखानपि ।
श्रीधर्मोऽप्युदरास्थीनि, श्रीशान्तिर्नाभिमण्डलम् ॥ १५ ॥
श्रीकुन्थुर्गुह्यकं रक्षेदरो लोमकटीतटम् ।
10 मल्लिरूरुपृष्ठमंसं, जङ्घे च मुनिसुव्रतः ॥ १६ ॥
पादाङ्गुलीर्नमी रक्षेच्छ्रीनेमिश्चरणद्वयम् ।
श्रीपार्श्वनाथः सर्वाङ्गं, वर्धमानश्चिदात्मकम् ॥ १७ ॥
पृथिवी-जल-तेजस्क-वाय्वाकाशमयं जगत् ।
रक्षेदशेष-पापेभ्यो, वीतरागो निरञ्जनः ॥ १८ ॥

15 श्रीऋषभदेव भगवान मस्तकनी रक्षा करो, श्री अजितनाथ भगवान आंखोनी रक्षा करो, श्रीसंभवनाथ भगवान् बन्ने कानोनी रक्षा करो, श्री अभिनंदन स्वामी बन्ने नासिकानी रक्षा करो, श्रीसुमतिनाथ भगवान बन्ने ओष्ठनी रक्षा करो, श्री पद्मप्रभ स्वामी दांतोनी रक्षा करो, तथा श्रीसुपार्श्वनाथ भगवान जीभनी रक्षा करो, श्री चन्द्रप्रभस्वामी तालुनी रक्षा करो, श्री सुविधिनाथ भगवान कंठनी रक्षा करो, श्री शीतलनाथ भगवान हृदयनी रक्षा करो, श्री श्रेयांसनाथ भगवान बन्ने बाहुनी रक्षा करो, श्री वासुपूज्य 20 स्वामी बन्ने हाथनी रक्षा करो, श्री विमलनाथ भगवान आंगळीओनी रक्षा करो, श्री अनन्तनाथ भगवान नखोनी रक्षा करो, श्री धर्मनाथ भगवान उदर अने अस्थिओनी रक्षा करो, श्री शान्तिनाथ भगवान नाभिमण्डलनी रक्षा करो, श्री कुंथुनाथ भगवान गुह्य-प्रदेशनी रक्षा करो, श्री अरनाथ भगवान रोमराजी अने केडनी रक्षा करो, श्री मल्लिनाथ भगवान छाती, पीठ अने खभानी रक्षा करो, श्रीमुनिसुव्रतस्वामी बन्ने जंघाओनी रक्षा करो, श्रीनमिनाथ भगवान पगनी आंगळीओनी रक्षा, करो, श्री नेमिनाथ भगवान बन्ने 25 चरणनी रक्षा करो, श्रीपार्श्वनाथ भगवान सर्वांगनी—शरीरना सर्व अवयवोनी रक्षा करो अने श्री महावीरस्वामी ज्ञान-स्वरूप आत्मानी रक्षा करो ॥ १२–१३–१४–१५–१६–१७ ॥

श्री अरिहंत परमात्मा पृथ्वी, जल, अग्नि, वायु अने आकाशात्मक जगतनुं वीतराग अने निरंजनरूपे सर्व पापथी रक्षण करो ॥ १८ ॥

३. ० दरस्थाने S । ४. ० पृष्ठिवश, पिण्डिका S । ५. पादगुल्फं न० S ।

राजद्वारे श्मशाने च, संग्रामे शत्रु-सङ्कटे ।
व्याघ्र-चौराग्नि-सर्पादि-भूत-प्रेत-भयाश्रिते ॥ १९ ॥

अकाले मरणे प्राप्ते, दारिद्र्यापत्समाश्रिते ।
अपुत्रत्वे महादुःखे, मूर्खत्वे रोगपीडिते ॥ २० ॥

डाकिनी-शाकिनीग्रस्ते, महाग्रहगणार्दिते ।
नद्युत्तारेऽध्ववैषम्ये[८], व्यसने चापदि स्मरेत् ॥ २१ ॥

प्रातरेव समुत्थाय, यः स्मरेज्जिनपञ्जरम् ।
तस्य किञ्चिद् भयं नास्ति, लभते सुखसम्पदः ॥ २२ ॥

जिन-पञ्जरनामेदं, यः स्मरेदनुवासरम् ।
कमलप्रभराजेन्द्र–,श्रियं स लभते नरः ॥ २३ ॥

(इन्द्रवज्रा-वृत्तम्)

प्रातः समुत्थाय पठेत् कृतज्ञो यः स्तोत्रमेतज्जिनपञ्जरस्य ।
आसादयेच्छ्रीकमलप्रभाख्यां लक्ष्मीं मनोवाञ्छितपूरणाय ॥ २४ ॥

श्रीरुद्रपल्लीयवरेण्यगच्छे, देवप्रभाचार्यपदाब्जहंसः ।
वादीन्द्रचूडामणिरेष जैनो, जीयाद् गुरुः श्रीकमलप्रभाख्यः ॥ २५ ॥

राजद्वारमा, श्मशानमा, संग्राममा, शत्रुओथी आवेली आपत्तिमा, वाघ, चोर, अग्नि, सर्प प्रमुख हिंसक प्राणीओ तथा भूत प्रेतना भय वखते, अकाळ मृत्यु वखते, दारिद्र्यरूप आपत्तिना समयमां, पुत्र प्राप्ति माटे, महान् दुःख वखते, मूर्खपणामा, रोगनी पीडामां डाकिनी अने शाकिनीना वळगाड वखते, मोटा ग्रहोना समुदायथी थता दुःखमा, नदीने उतरती वखते, मार्गनी विषमतामां, कष्टमा अने आफतमा आ (जिनपंजर स्तोत्र) नुं स्मरण करवु जोईए ॥ १९–२०–२१ ॥

प्रातःकाळमा ऊठीने जे 'जिन पंजर-स्तोत्र'नु स्मरण करे, तेने कोई जातनो भय थतो नथी अने सुख-संपत्तिओ प्राप्त थाय छे ॥ २२ ॥

'जिनपंजर' नामना आ स्तोत्रनुं जे प्रतिदिन स्मरण करे छे, ते मनुष्य कमळ समान कान्तिवाळा चक्रवर्तीनी समृद्धिने (?) प्राप्त करे छे । (आ श्लोकमा आ स्तोत्रना कर्ता श्रीकमलप्रभसूरिए पोतानुं नाम पण सूचव्यु छे ।) ॥ २३ ॥

प्रातःकाळमा ऊठीने जे कृतज्ञ पुरुष आ 'जिनपंजर' नामना स्तोत्रने भणे ते मनना अभिलाषोने पूर्ण करनारी श्रीकमलप्रभा नामे प्रसिद्ध (?) एवी लक्ष्मीने प्राप्त करे ॥ २४ ॥

श्रीरुद्रपल्लीय नामना श्रेष्ठ गच्छमां श्री देवप्रभाचार्यनां चरण-कमळने विषे हंस-समान अने जैनवादीन्द्रचूडामणि श्रीकमलप्रभ नामना सूरि जय पामो ॥ २५ ॥

६. कालम. S । ७. दारिद्र्येऽपि स° S । ८. °म्ये विषमे वा यदि स्मरन् S । ९. °संपदम् S । १०. °भसूरीन्द्रः श्रेयांसि ल० S । ११. जीयादसौ श्री० S ।

परिचय

श्रीकमलप्रभसूरिरचित जिनपञ्जरस्तोत्र अनेक स्थळे प्रसिद्ध थयुं छे, छतां मुंबई श्रीशान्तिनाथजी जैन मंदिरना हस्तलिखित संग्रहनी प्रति न. २६७ नी एक शुद्ध प्रति अमने मळी हती तेना आधारे पाठभेदो लईने, अने मूलपाठ संशोधीने, अनुवाद साथे अहीं प्रगट करेल छे।

5 पचपरमेष्ठी तेम ज चोवीश तीर्थंकरोनो शरीरमां कये कये स्थळे न्यास करवो अने ए प्रकारना न्यासनु शु फळ मळे, ते आ स्तोत्रमां जणाव्यु छे।

पू. पं. श्रीधुरंधरविजयजी गणिवर्य
हस्तलिखित पाठ.

[६३-१८]

महामहोपाध्यायश्रीयशोविजयगणिविरचिता
परमात्मपञ्चविंशतिका ।

परमात्मा परंज्योतिः, परमेष्ठी निरञ्जनः ।
अजः सनातनः शम्भुः, स्वयम्भूर्जयताज्जिनः ॥ १ ॥ 5
नित्यं विज्ञानमानन्दं, ब्रह्म यत्र प्रतिष्ठितम् ।
शुद्धबुद्धस्वभावाय, नमस्तस्मै परात्मने ॥ २ ॥
अविद्याजनितैः, सर्वैर्विकारैरनुपद्रुतः ।
व्यक्त्या शिवपदस्थोऽसौ, शक्त्या जयति सर्वगः ॥ ३ ॥
यतो वाचो निवर्तन्ते, न यत्र मनसो गतिः । 10
शुद्धानुभवसंवेद्यं, तद्रूपं परमात्मनः ॥ ४ ॥
न स्पर्शो यस्य नो वर्णो, न गन्धो न रस-श्रुती ।
शुद्धचिन्मात्रगुणवान्, परमात्मा स गीयते ॥ ५ ॥
माधुर्यातिशयो यद्वा, गुणौघः परमात्मनः ।
तथाऽऽख्यातुं न शक्योऽपि, प्रत्याख्यातुं न शक्यते ॥ ६ ॥ 15

अनुवाद

परमात्मा, परज्योति, परमेष्ठी, निरञ्जन, अज, सनातन, शम्भु अने स्वयभू एवा श्री जिनेश्वर भगवान जयवंता वर्तो ॥ १ ॥

जेनामा नित्य विज्ञान (केवल ज्ञान), आनंद अने ब्रह्म प्रतिष्ठित छे अने जेओ शुद्ध अने बुद्ध स्वभाववाळा छे ते परमात्माने हु नमस्कार करुं छुं ॥ २ ॥ 20

अविद्याथी उत्पन्न थयेला सर्व विकारोथी अक्षुब्ध, व्यक्तिरूपे मोक्षमां रहेला किन्तु शक्तिरूपे सर्वव्यापी एवा परमात्मा जयवंता वर्ते छे ॥ ३ ॥

ज्यांथी (जे स्वरूपनु वर्णन न करी शकवाथी) वाणीओ पाछी फरे छे अने ज्या मननी गति नथी किन्तु केवळ शुद्ध अनुभव ज्ञानवडे जे संवेद्य छे ते परमात्मरूप छे ॥ ४ ॥

जेने स्पर्श नथी, वर्ण नथी, गन्ध नथी, रस नथी, तथा श्रुति नथी किन्तु जे शुद्ध चिन्मात्र 25 गुणवाळा छे ते परमात्मा कहेवाय छे ॥ ५ ॥

अथवा परमात्माना गुणोनो समूह माधुर्यातिशयरूप छे । ते गुणसमूह यथार्थरीते कही शकातो नथी, छतां ते तेवी रीते नथी एम पण कही शकातुं नथी ॥ ६ ॥

बुद्धो जिनो हृषीकेशः, शम्भुर्ब्रह्माऽऽदिपुरुषः ।
इत्यादि नामभेदेऽपि, नार्थतः स विभिद्यते ॥ ७ ॥
धावन्तोऽपि नयाः नैके (सर्वे), तत्स्वरूपं स्पृशन्ति न ।
समुद्रा इव कल्लोलैः, कृतप्रतिनिवृत्तयः ॥ ८ ॥
5 शब्दोपरक्ततद्रूपबोधकृन्नयपद्धतिः ।
निर्विकल्पं तु तद्रूपं, गम्यं नानुभवं विना ॥ ९ ॥
केषां न कल्पनादर्वी, शास्त्रक्षीरान्नगाहिनी ।
स्तोकास्तत्त्वरसास्वादविदोऽनुभवजिह्वया ॥ १० ॥
जितेन्द्रिया जितक्रोधा, दान्तात्मानः शुभाशयाः ।
10 परमात्मगतिं यान्ति, विभिन्नैरपि वर्त्मभिः ॥ ११ ॥
नूनं मुमुक्षवः सर्वे, परमेश्वरसेवकाः ।
दूरासन्नादिभेदस्तु, तद्भृत्यत्वं निहन्ति न ॥ १२ ॥
नाममात्रेण ये दृप्ता, ज्ञानमार्गविवर्जिताः ।
न पश्यन्ति परात्मानं, ते घूका इव भास्करम् ॥ १३ ॥

15 तेना बुद्ध, जिन, हृषीकेश, शम्भु, ब्रह्मा, आदिपुरुष वगेरे भिन्न भिन्न नामो होवा छतां पण अर्थथी ते परमात्मामां भेद करी शकातो नथी ॥७॥

जेम समुद्रो पोताना तरंगोवडे मर्यादा बहारनी भूमिने स्पर्श करवा जाय छे छतां किनारा साथे अथडाईने पोताना तरंगो साथे पाछा फरे छे, तेम नयो पोतानी विकल्प जाळ वडे परमात्म-स्वरूपने स्पर्शवा दोडे छे – प्रयत्न करे छे, छतां ते स्वरूपने पामी शकता नथी किन्तु पाछा फरे छे (तात्पर्य ए छे के 20 परमात्मानु रूप सर्व नयपद्धतिओथी पर छे, तेथी ते नयोनी पकडमां शी रीते आवी शके ?) ॥८॥

नय पद्धति तो शब्दथी उपरक्त एवा परमात्मस्वरूपनो बोध करावनारी छे, ज्यारे तेनुं निर्विकल्प रूप तो अनुभव विना समजाय तेवुं नथी ॥९॥

क्या पुरुषनी कल्पनारूप कडछी शास्त्ररूप क्षीरान्नमां प्रवेश करती नथी ? परन्तु अनुभवरूप जीभवडे तत्त्वना रसास्वादने जाणनारा पुरुषो तो थोडा ज होय छे ॥१०॥

25 जितेन्द्रिय, जितक्रोध, दान्त अने शुभ आशयवाळा महात्माओ भिन्न भिन्न मार्गोथी पण परमात्मगतिने प्राप्त करे छे ॥११॥

खरेखर सर्व मुमुक्षुओ परमेश्वरना सेवक छे, दूरपणानो के नजीकपणानो भेद परमात्माना सेवकपणामां व्याघात करी शकतो नथी। (कोई नजीकमां मोक्षे जनारा होय, तो कोई लांबा काळ पछी, पण तेथी परमात्मसेवकतामां भेद पडतो नथी) ॥१२॥

30 'बुद्ध ज परमात्मा' छे', 'शम्भु ज परमात्मा छे' इत्यादि रीते जेओ नाममात्रथी गर्वित छे तेओ ज्ञानमार्गथी दूर छे। जेम घुवडो सूर्यने जोई शकता नथी तेम तेओ परमात्माने जोई शकता नथी ॥१३॥

श्रमः शास्त्राश्रयः सर्वो, यज्ज्ञानेन फलेग्रहिः ।
ध्यातव्योऽयमुपास्योऽयं, परमात्मा निरञ्जनः ॥ १४ ॥
नान्तराया न मिथ्यात्वं, हासो रत्यरती च न ।
न भीर्यस्य जुगुप्सा नो, परमात्मा स मे गतिः ॥ १५ ॥
न शोको यस्य नो कामो, नाज्ञानाविरती तथा । 5
नावकाशश्च निद्रायाः, परमात्मा स मे गतिः ॥ १६ ॥
रागद्वेषौ हतौ येन, जगत्त्रयभयङ्करौ ।
स त्राणं परमात्मा मे, स्वप्ने वा जागरेऽपि वा ॥ १७ ॥
उपाधिजनिता भावा, ये ये जन्मजरादिकाः ।
तेषां तेषां निषेधेन, सिद्धं रूपं परात्मनः ॥ १८ ॥ 10
अतद्व्यावृत्तितो भिन्नं, सिद्धान्ताः कथयन्ति तम् ।
वस्तुतस्तु न निर्वाच्यं, तस्य रूपं कथञ्चन ॥ १९ ॥
जानन्नपि यथा म्लेच्छो, न शक्नोति पुरिगुणान् ।
प्रवक्तुमुपमाभावात्, तथा सिद्धसुखं जिनः ॥ २० ॥

शास्त्रने आश्रयीने करेलो परिश्रम जेना ज्ञानथी फळवाळो (सफळ) थाय छे, ते आ निरंजन 15 एवा परमात्मा ध्यान करवा योग्य छे अने उपासना करवा योग्य छे ॥ १४॥

जेमने अंतरायो (पांच प्रकारना अंतरायकर्म) नथी, मिथ्यात्व नथी, हास्य नथी, रति नथी, अरति नथी, भय नथी, ते परमात्मा मने शरण हो ॥ १५॥

जेमने शोक नथी, काम नथी, अज्ञान नथी, अविरति नथी अने निद्रा नथी, ते परमात्मा मने शरण हो ॥ १६ ॥ 20

त्रणे जगतने भयभीत करनार एवा राग अने द्वेषने जेमणे हण्या छे ते परमात्मा जागृत अवस्थामां अने स्वप्न अवस्थामां पण मने शरण हो ॥ १७॥

कर्मरूप उपाधिथी जनित एवा जन्म जरा वगेरे जे जे भावो छे ते ते बधा भावोना निषेधवडे परमात्मानु स्वरूप सिद्ध थाय छे ॥ १८॥

सिद्धान्तो 'अ-तद्' रूप व्यावृत्तिवडे ('आ नहि, आ नहि' एम परमात्माथी भिन्न वस्तुओनी 25 व्यावृत्ति द्वारा) परमात्माने इतर वस्तुओथी भिन्न कहे छे, परन्तु परमार्थथी तो ते परमात्मानुं स्वरूप कोई पण प्रकारे निर्वाच्य (संपूर्ण रीते कही शकाय तेवुं) नथी ॥ १९ ॥

जेम गामडिओ माणस नगरीना गुणोने जाणवा छतां पण उपमाना अभावमा कहेवाने शक्तिमान थतो नथी तेम सर्वज्ञ भगवान पण सिद्धना सुखनु वर्णन उपमा न होवाथी करी शकता नथी ॥ २० ॥

१. जुओ श्री आचारांग सूत्र अ. ५, अंतिम सूत्र—'न सद्दे, न रूवे, न रसे...... ।' 30

सुरासुराणां सर्वेषां, यत् सुखं पिण्डितं भवेत् ।
एकत्रापि हि सिद्धस्य, तदनन्ततमांशगम् ॥ २१ ॥
अदेहा दर्शनज्ञानोपयोगमयमूर्त्तयः ।
आकालं परमात्मानः, सिद्धाः सन्ति निरामयाः ॥ २२ ॥
5 लोकाग्रशिखरारूढाः, स्वभावसमवस्थिताः ।
भवप्रपञ्चनिर्मुक्ताः, युक्तानन्तावगाहनाः ॥ २३ ॥
इलिका भ्रमरीध्यानात्, भ्रमरीत्वं यथाश्नुते ।
तथा ध्यायन् परात्मानं, परमात्मत्वमाप्नुयात् ॥ २४ ॥
परमात्मगुणानेवं, ये ध्यायन्ति समाहिताः ।
10 लभन्ते निभृतानन्दास्ते यशोविजयश्रियम् ॥ २५ ॥

॥ इति परमात्मपञ्चविंशतिका ॥

समग्र देवताओ अने असुरोनु सुख एकज स्थळे पिंडित करवामा आवे तो पण ते सिद्धना सुखनो अनन्ततम भाग ज थाय ॥ २१ ॥

देह रहित, केवळ दर्शनोपयोग अने केवळ ज्ञानोपयोगमय रूपवाळा अने निरामय एवा सिद्ध 15 परमात्माओ सर्वदा विद्यमान होय छे ॥ २२ ॥

ते सिद्ध भगवनो लोकाग्र (सिद्धशिला) रूप शिखर पर आरूढ, स्वभावमा समवस्थित अने भवप्रपचथी विनिर्मुक्त छे। एक सिद्धनी अवगाहनावाळा आकाश प्रदेशोमा अनन्त सिद्धो रहेला छे ॥ २३ ॥

जेम इयळ भ्रमरीना ध्यानथी भ्रमरीपणाने पामे छे, तेम परमात्मानु ध्यान करतो जीवात्मा परमात्मपणाने पामे छे, ॥ २४ ॥

20 ए रीते परमात्मगुणोनु जेओ समाहित मनवडे ध्यान करे छे तेओ परमानदथी परिपूर्ण बनीने (परिपूर्ण) **यश** अने (परिपूर्ण) **विजय**रूप मोक्षलक्ष्मीने पामे छे ॥ २५ ॥

परिचय

उपा० श्रीयशोविजयजीए रचेली आ पचीशी सुप्रसिद्ध छे। अनेक संग्रहग्रंथोमा ए प्रकाशित थयेल छे। तेमाना एक प्रकाशन उपरथी आ पचीशीनो, संग्रह करीने, तेने अनुवाद साथे अहीं प्रगट करी छे।
25 परमेष्ठी एवा जिनेश्वरनु शुद्ध स्वरूप आ पचीशीमा उपाध्यायजी महाराजे सुदर रीते प्रदर्शित कर्युं छे।

सत्तरमा सैकामां थयेला आ सर्वांगीण विद्वाननो परिचय 'यशोविजयस्मृतिग्रंथ' मांथी जाणी शकाय एम छे।

॥ श्रीपञ्चपरमेष्ठिनमस्कारमहामन्त्रः ॥

नमो अरिहंताणं
नमो सिद्धाणं
नमो आयरियाणं
नमो उवज्झायाणं
नमो लोए सव्वसाहूणं
एसो पंचनमुक्कारो सव्वपावप्पणासणो ।
मंगलाणं च सव्वेसिं पढमं हवइ मंगलं ॥

पू. मुनिश्री जम्बूविजयजी महाराज
हस्तलिखित पाट.

श्रीसिंहनन्दिभट्टारकविरचित-
पञ्चनमस्कृतिदीपकसंदर्भः ॥

नमाम्यहं तं देवेशं, लक्ष्मीरात्यन्तिकी स्वयम् ।
यस्य निर्धूतकर्मेन्धधूमस्यापि विराजते ॥ १ ॥ 5
यस्य प्रभावो देवेशैरपि वक्तुं न शक्यते ।
तत्र मानुषव्यापारः, केवलं हास्यतास्पदम् ॥ २ ॥
विघ्न-चौरारि-मार्योघाः, शाकिन्यादिगणा अपि ।
यस्य स्मरणमात्रेण, प्रलयं यान्ति तेऽखिलाः ॥ ३ ॥
यस्य प्रभावतो बुद्धिर्जायते जीवसंनिभा । 10
तं नमस्कृत्य पञ्चाङ्गमन्त्रं तत्कल्पमुच्यते ॥ ४ ॥
तत्राधिकाराः पञ्चैव, साधनं ध्यान-कर्मणी ।
स्तवनं फलमित्येतद्, यदुक्तं पूर्वसूरिभिः ॥ ५ ॥
तदेव संक्षिप्यारम्य, प्रक्रियाद्वारतः खलु ।
करोमि देयं नान्यस्य, दुष्टमिथ्यादृशः खलु ॥ ६ ॥ 15
तदेव गायत्रीमन्त्रं, तदेवाष्टकमुच्यते ।
तदेव पञ्चकं प्रोक्तं, षट्द(दा)र्शनिकसम्मतम् ॥ ७ ॥

अनुवाद *

ते देवाधिदेवने हुं नमस्कार करुं छुं के कर्मरूपी इन्धननो धूमाडो दूर थवाथी (?) जेमनी संपूर्ण लक्ष्मी स्वयं अत्यंत शोभे छे ॥ १ ॥ 20

जेमनो प्रभाव देवेंद्रो पण कहेवाने शक्तिमान नथी, त्यां मनुष्यनी प्रवृत्ति केवळ हांसीने पात्र गणाय ॥ २ ॥

जेमना स्मरणमात्रथी विघ्न, चोर, शत्रु अने मरकी वगेरे तेमज शाकिनी आदिना समूहो नाश पामे छे जेना प्रभावथी बुद्धि जीवसदृश असंमूढ बने छे (?) ते पंचाग (पंचमंगल) मंत्रने नमस्कार करीने हुं तेनो कल्प कहुं छुं ॥ ३-४ ॥ 25

ते (कल्प) मां १ साधन, २ ध्यान, ३ कर्म-क्रिया, ४ स्तवन अने ५ फळ—ए पांच अधिकारो छे. (आ विषयमां) जे पूर्वाचार्योए कह्युं छे तेने ज संक्षेपीने अने प्रक्रिया द्वारथी शरु करीने हुं कहुं छुं। आ कल्प (अयोग्य एवा) अन्यने न आपवो अने दुष्ट एवा मिथ्यादृष्टिने तो न ज आपवो ॥ ५-६ ॥

ते (पंच मंगल) ज गायत्री मंत्र छे, ते ज अष्टक छे, अने ते ज छये दर्शनीओने मान्य एवुं पंचक छे ॥ ७ ॥ 30

* मूल रचना भाषानी दृष्टिए विचित्र होवाथी केटलाक स्थळोमां मात्र भावानुवाद आपेल छे।

यन्त्रं चिन्तामणिर्नाम, कलिकुण्डाख्ययन्त्रकम् ।
पञ्चाराध्यपदं यन्त्रं, गणभृद्वलयाभिधम् ॥ ८ ॥
पार्श्वचक्रं वीरचक्रं, सिद्धचक्रं त्रिलोकयुक् ।
कर्मचक्रं योगचक्रं, ध्यानचक्रपिच्छेड(विच्छेद)कम् ॥ ९ ॥
5 भूतयन्त्रं(चक्रं) तीर्थचक्रं, जिनचक्रं वशीकरम् ।
ध्यानचक्रं मोक्षचक्रं, श्रेयश्चक्रं सुशान्तिकृत् ॥ १० ॥
सर्वरक्षाकरं वृद्धमृत्युञ्जयसुनामकम् ।
लघुमृत्युञ्जयं नाम, मोक्षदं वाञ्छितप्रदम् ॥ ११ ॥
फलदं ज्वालिनीचक्रं, शुभं चैवाम्बिकाचक्रम् ।
10 वरं चक्रेश्वरीचक्रं, बृहच्छान्तिकचक्रकम् ॥ १२ ॥
यागमण्डलसच्चक्रं, यज्ञचक्रं मनोहरम् ।
भैरवं चक्रमिन्द्राख्यमित्यादि सकलं बहु ॥ १३ ॥
यन्त्रराजागमोक्तं यत्, तदेतेन विना न च ।
सिद्धेन सिद्ध्यत्येव, नियमोऽस्ति जिनागमे ॥ १४ ॥
15 यस्य स्मरणमात्रेण, वराङ्गस्य भयं गतम् ।
द्वीपिनोऽथ तथा श्रेष्ठी, सुदर्शन अपि स्वयम् ॥ १५ ॥
भयमुक्तो बभूवास्य, प्रभावेन महाजनाः ।
द्वात्रिंशदभिधानास्ते, गता द्वीपान्तरं मुदा ॥ १६ ॥
किमस्य वर्ण्यं माहात्म्यं, जिह्वया चैकया खलु ।
20 कोटिजिह्वादिभिर्न्नयाद्, गणेशोऽत्र किमुच्यते ॥ १७ ॥

(यत्रोमां) चिन्तामणि नामनुं, कलिकुंड नामनु, पचाराध्यपद नामनु, अने गणधरवलय नामनुं यंत्र छे, (ए सिवाय) पार्श्वचक्र, वीरचक्र, सिद्धचक्र, त्रिलोकयुक् (त्रिलोकचक्र), कर्मचक्र, योगचक्र, बीजाना हानिकर ध्यानने छेदनार चक्र, भूतचक्र, तीर्थचक्र, जिनचक्र, वशीकरचक्र, ध्यानचक्र, मोक्षचक्र, शांतिने करनारुं श्रेयश्चक्र, सर्वनी रक्षा करनारु वृद्धमृत्युञ्जय नामक चक्र, मोक्ष अने वांछित आपनारुं लघु-
25 मृत्युंजय नमक चक्र, सफळ एवु ज्वालिनीचक्र, शुभ एवु अंबिकाचक्र, श्रेष्ठ एवु चक्रेश्वरीचक्र, बृहत शांतिचक्र, सुंदर एवु यागमण्डलचक्र, मनोहर, यज्ञचक्र, भैरवचक्र अने इन्द्रचक्र वगेरे जे अनेक चक्रो 'यत्रराज आगम' मां कहेला छे ते बधा आ नमस्कार मंत्र (यंत्र) ने साध्या विना सिद्ध थतां नथी अने ए सिद्ध थतांज बधां सिद्ध थाय छे, एवो जिनागममां नियम छे ॥ ८–९–१०–११–१२–१३–१४॥

एना स्मरणमात्रथी वरांगनो हाथीनो भय गयो अने श्रेष्ठी सुदर्शन पण स्वयं भयमुक्त
30 थया, आ (नमस्कार) ना प्रभावथी बत्रीश नामवाळा (?) महाजनो पण आनंदपूर्वक बीजा द्वीपमां गया ॥ १५–१६ ॥

खरेखर, आनुं माहात्म्य एक जीभे कई रीते वर्णवी शकाय ? अहीं श्रीगणधर भगवान करोडो जिह्वाओ वडे कहे तो पण न कही शके, तो पछी अमे शी रीते कही शकीए ? ॥ १७ ॥

अपवित्रे पवित्रेऽपि, सुस्थिते दुःस्थितेऽपि वा।
यत् सर्वकृत् परं मन्त्रं, न त्याज्यं विबुधैरिह ॥ १८ ॥
इदं चित्रं महत् स्याच्च, मोक्षदं यद् वशीकृति—।
प्रमुखानि च कर्माणि, चेप्सितानि ददाति नु ॥ १९ ॥
यमो मुनिर्महामूर्खो, मन्त्रपादैकजल्पनात्। 5
भूयो भूयः पदध्यानात्, सातर्द्धीः प्राप्तवान् किमु ॥ २० ॥

अथ साधनमाह—

पूर्वा ककुप् पुष्पमाला, शुक्ला पद्मासनं वरम्।
बोधमुद्रा मोक्षमुद्रा, कालः प्रभात इष्यते ॥ २१ ॥
क्षेत्रं शुद्धं तटाकादितीरं द्रव्यं मनोहरम्। 10
भावो मन्त्रलयो ज्ञेयः, स्वेष्टपल्लवयोजनम् ॥ २२ ॥
कर्म मोक्षप्रधानं स्याद्, गुणः श्वेतस्य चिन्तनम्।
सामान्यं मूलमन्त्रं स्याद्, विशेषस्तत्परो मतः ॥ २३ ॥
पूजाद्रव्यं कुङ्कुमं च, सदकं चरुसंचयम्।
रत्नदीपकं वामे च, धूपकुण्डं च दक्षिणे ॥ २४ ॥ 15

अपवित्र के पवित्र, सुस्थित के दुःस्थित व्यक्ति विषे पण जे सर्व कार्यकर श्रेष्ठ मंत्र छे, तेनो डाह्या माणसोए त्याग न करवो जोईए ॥ १८ ॥

ए भारे आश्चर्य छे के जे (मन्त्र) मोक्ष आपनार छे ते ज वशीकरण वगेरे कर्मो (करी आपे छे) अने वळी वांछितो ने पण आपे छे ॥ १९ ॥

यम नामना मुनि (आ) मन्त्रना एक पदना जल्पथी, अने वारवार ए पदनु ध्यान करवाथी 20 साचे ज शाता अने ऋद्धिओ पाम्या हता (?) ॥ २० ॥

साधनप्रकार—

[1]पूर्व दिशा, श्वेत पुष्पनी माळा, श्रेष्ठ पद्मासन, बोध(ज्ञान)मुद्रा अथवा मोक्षमुद्रा अने समय प्रभातनो होवो जोईए ॥ २१ ॥

क्षेत्र-स्थान शुद्ध-स्वच्छ एवु तळाव वगेरेना काठानुं, (नैवेद्य आदि) द्रव्यो सुंदर, भाव मंत्रलयनो 25 अने पोताने इष्ट एवा पल्लवनी योजना करवी ॥ २२ ॥

कर्म मोक्ष-प्रधान होवुं जोईए, श्वेतवर्णनुं चिंतन (श्वेत वर्णमां ध्यान) ते गुण छे, मूलमंत्र ते सामान्य छे अने तत्परता ते विशेष कहेवाय छे ॥ २३ ॥

पूजा द्रव्य, कुंकुम, सदक-एक जातनु फळ (?) चरुसंचय-एक प्रकारनुं पात्र (?) डाबी बाजुए रत्नदीपक अने जमणी बाजुए धूपकुंड करवो ॥ २४ ॥ 30

१ अहींथी अनुक्रमे दिग्-आसन-मुद्रा-काल क्षेत्र-द्रव्य-भाव-पल्लव-कर्म-गुण-सामान्य-विशेष वगेरेनुं वर्णन छे।

फलं देयं जिनेशस्य, पुरतो बीजपूरकम् ।
चु(चू)तं चोचाम्र-कदलीमुखं षट्कर्तुषु क्रमात् ॥ २५ ॥

कङ्कोलैला-लवङ्गादि-सर्वौषध्याभिषेचनम् ।
दधि-दुग्धेक्षु-सर्पिर्भिरभिषेको जिनस्य च ॥ २६ ॥

5 पश्चादुद्धृत्य तत्पीठान्मातृकायन्त्रपूजनम् ।
कृत्वा पीठे प्रतिस्था(ष्ठा)प्य, स्थिरां तां चिन्तयेदनु ॥ २७ ॥

चूर्णादिवासना पश्चाद्, वार्यधोवासना तथा ।
धान्यादिवासना चैव, फलवर्तिकवासना ॥ २८ ॥

पश्चाद् दिनत्रयं वस्त्रपरिधानं तथा ततः ।
10 मुखोद्घाटनमेतस्यानन्तरं स्यान्निराञ्जना (नीराजना) ॥ २९ ॥

पश्चादाकरशुद्धिं च, कृत्वा मन्त्रं जपेदनु ।
मूलमन्त्रमुपन्यस्तप्रतिज्ञो व्रतसंयुतः ॥ ३० ॥

सः पौषधी निराहारी, नियतो विजितेन्द्रियः ।
मनोवाक्कायसंशुद्धः, पञ्चमन्त्रं जपेदनु ॥ ३१ ॥

---

15 जिनेश्वर प्रतिमा समक्ष फळमां—बीजोरुं, आम्र, नारियेळ, केरी अने केळां वगेरे तेम ज सोपारी, इलायची, लवींग वगेरे छ ऋतुमां थनारां फळो क्रमशः मूकवां जोईए अने बधा प्रकारनी औषधिओथी अभिषेक करवो जोईए, (उपरांत) दहीं, दूध, शेरडी अने घीथी श्री जिनेश्वरनी प्रतिमानो अभिषेक करवो ॥ २५–२६ ॥

ए पछी ते पीठथी उपाडीने मातृकायन्त्रनुं पूजन करी, पीठमां फरीथी स्थापना (प्रतिष्ठा) 20 करवी, पछी ते प्रतिष्ठा स्थिर छे एम चिंतन करवुं ॥ २७ ॥

पछी चूर्ण—वासक्षेप वगेरेनी वासना आप्या पछी पाणीनी अधोवासना (?) आपवी, (ते पछी) धान्य वगेरेनी वासना तथा फळ अने दीवानी वासना आपवी ॥ २८ ॥

ए पछी मातृकायन्त्र त्रण दिवस सुधी वस्त्रथी ढांकी देवुं, वळी ते पछी तेनां मुखनुं उद्घाटन करवुं अने पछी आरती करवी ॥ २९ ॥

25 पछी कुंडनी शुद्धि करीने मंत्रजाप करवो। पछी व्रत करीने मूळमंत्रना अमुक जपादि विशे प्रतिज्ञाबद्ध थवुं ॥ ३० ॥

ते पछी पौषधवान, नियमवान, संयत, जितेंद्रिय अने मन-वचन-कायाथी संशुद्ध एवा तेणे पचनमस्कारमंत्रनो जाप करवो ॥ ३१ ॥

तद्विधाने पूर्वदिने (?), गत्वा तु जिनमन्दिरे ।
प्रतिमां श्रुतमभ्यर्च्य, कृत्वाऽनु गुरुपूजनम् ॥ ३२ ॥
गुरोराज्ञां समादाय, गुरुहस्तं समुद्धरेत् (?) ।
मस्तके न्यस्य (?) सद्भाग्यं, मत्वा गत्वान्तरे गृहे ॥ ३३ ॥
तत्र मन्त्र(न्त्रं) जपेद् यावत्, कार्यसिद्धिर्न संभवेत् । 5
तावत् तत्र नियन्ता वा, याथातथ्येन योजयेत् ॥ ३४ ॥
मन्त्रस्याख्या तु पञ्चाङ्गं, नमस्कारस्तु पञ्चकम् ।
अनादिसिद्धमन्त्रोऽयं, न हि केनापि तत् कृतम् (स कृतः) ॥ ३५ ॥
पूर्वे येऽपि जिना यातास्ते वै यास्यन्ति यान्ति च ।
इत्यनेनैव हि मुक्त्यङ्गं, मूलमन्त्रमनादितः ॥ ३६ ॥ 10
जानुदघ्ने जले वाऽपि, पर्वते वाऽऽतपस्थितौ ।
केनापि योगकार्येण, कार्यं साध्यं सुधीमता ॥ ३७ ॥
एतन्मन्त्रं च शोध्यं नाऽकडमादिकचक्रतः ।
स्वयंभूततया शुद्धः, शोधनेन किमु स्फुटम् ॥ ३८ ॥
विघ्नौघाः प्रलयं यान्ति, शाकिनी-भूत-पन्नगाः । 15
विषं निर्विषतां याति, ध्यायमाने सुपञ्चके ॥ ३९ ॥

पछीना (?) दिवसे जिनमंदिरमां जई जिनप्रतिमा अने श्रुतज्ञानने पूजीने पछी गुरुनी पूजा करवी। पछी गुरुनी आज्ञा लईने गुरुनो हाथ लेई पोताना मस्तक उपर मूकवो (?)। ते वखते पोते भाग्यशाळी छे एम मानीने गृहना एकान्त भागमां जई त्यां कार्यनी सिद्धि न थाय त्यांसुधी मंत्रनो जाप करवो। ते समये त्यां यथार्थ रीतिए नियंता—उत्तरसाधकनी (?) पण योजना करवी ॥ ३२–३३–३४ ॥ 20

'पंचांग' ए मंत्रनुं नाम छे, तेमां पांच नमस्कार छे। आ मन्त्र अनादिसिद्ध छे, ते कोईए रचेल नथी ॥ ३५ ॥

पूर्वे जे कोई जिनो मुक्तिमां गया, भविष्यमा जशे अने वर्त्तमानमां जाय छे, ते बधा आ पंचनमस्कार वडे ज। तेथी आ मूलमंत्र अनादि काळथी मुक्तिनुं अंग छे (?) ॥ ३६ ॥

ढींचण सुधीना पाणीमां, पर्वत पर, तडकामां अथवा कोई पण योगकार्य (आसनादि) द्वारा आ (मंत्र) ने बुद्धिशाळी पुरुषे साधवो जोइए ॥ ३७ ॥ 25

आ मंत्रने 'अकडम'* आदि चक्रथी शोधवो नहीं। केमके ए स्वयंभूत-आप मेळे उत्पन्न थयेलो होवाथी शुद्ध छे, तेथी स्पष्ट छे के शोधवानुं कोई प्रयोजन नथी ॥ ३८ ॥

पंच परमेष्ठिनुं ध्यान करतां विघ्नना समूहो, तेम ज शाकिनी, भूत अने पन्नग-सर्प वगेरेना उपसर्गो नाश पामे छे अने विष निर्विष बनी जाय छे ॥ ३९ ॥ 30

---

* 'अकडम' चक्र द्वारा पोताना माटे योग्य एवो मंत्र शोधी शकाय छे।

'ॐ नमः सिद्ध'मित्याख्या, यथा कार्यस्य साध(धि)का ।
तथा सादृश्यतो ज्ञेयं, मन्त्रं पारमगौरुकम् ॥ ४० ॥
'ॐ नमोऽर्हद्भ्य' इत्याख्या, प्रथमा जायते पदी ।
'ॐ नमः सिद्धभ्य' इति, जायते द्वितीया पदी ॥ ४१ ॥
5 'ॐ नमो(म) आचार्येभ्य'श्च, जायते तृतीया पदी ।
'ॐ नमः(म) उपाध्यायेभ्यो', जायते तुर्या सत्पदी ॥ ४२ ॥
'ॐ नमः सर्वसाधुभ्यो', जायते पञ्चमी पदी ।
[इति संस्कृतमन्त्रेण, सर्वसिद्धिर्भविष्यति ॥ ४३ ॥]

'ॐ नमः सिद्धम्' ए नामनो मंत्र जेम बधा कार्यो सिद्ध करे छे तेम परमगुरुओ (पंचपरमेष्ठि) 10 संबंधि आ मंत्र पण सर्व कार्योनी सिद्धि करे छे ॥ ४० ॥

'ॐ नमो अर्हद्भ्यः' ए नामनी प्रथमपदी (पद १) छे, तेम 'ॐ नमः सिद्धेभ्यः' ए द्वितीय पदी छे, 'ॐ नमो आचार्येभ्यः' ए त्रीजी पदी छे, 'ॐ नमः उपाध्यायेभ्यः' ए चोथी सत्पदी छे, 'ॐ नमः सर्वसाधुभ्यः' ए पांचमी पदी छे। आ प्रमाणे (आ) संस्कृत मंत्रथी सर्व कार्योनी सिद्धि थशे ॥ ४१–४२–४३ ॥

15
परिचय

दिगंबर सम्प्रदायना, भट्टारक श्रीसिंहनंदिए रचेली 'पंचनमस्कृतिदीपक' नामनी कृति अमने कलकत्ता, रोयल एशियाटिक सोसायटीना संग्रहमांथी मळी आवी छे। नमस्कारमंत्र विषयक आ ग्रंथमां पांच अधिकारो आपेला छे—१ साधनअधिकार, २ ध्यानअधिकार, ३ कर्मअधिकार, ४ स्तवअधिकार, अने ५ फलअधिकार। प्रत्येक अधिकारमां मन्त्रविषयक अनेक हकीकतो गद्य अने पद्यमां आपेली छे।

20 आ ग्रंथना मंगलाचरणना ४३ श्लोको नमस्कार विशे सारी माहिती आपे छे अने कांईक व्यापक दृष्टिए नमस्कार विशे विचार दर्शावे छे। ते अही अनुवाद साथे प्रगट करेल छे।

श्लोक १–७ मंगलाचरण अने ग्रन्थनु अभिधेय जणावे छे। श्लोक ८–१३ अनेक यंत्रोनां नामो नोंधे छे। श्लो० १४–१७ यंत्रनु माहात्म्य जणावे छे। श्लो० १८–२० मंत्रनो महिमा दर्शावे छे। श्लो० २१–३४ मंत्रनां साधनोनो विचार आप्यो छे अने श्लो० ३५–४३ नमस्कार मंत्रनो महिमा, न्यास, 25 संस्कृत भाषामय मंत्र विशे प्रश्न अने समाधान तेम ज अरिहंतना अर्थ विशे माहिती आपे छे।

आ ४३ श्लोकोमां जेवी माहिती आपी छे तेवी ज माहितीथी भरेलो समग्र ग्रन्थ छे।

लगभग अढारमा सैकामां थयेला भट्टारक श्रीसिंहनंदिए आ रचना करी छे, अंतनी प्रशस्तिमां तेमणे पोतानी गुरुपरंपरा वगेरे माहिती आपी छे।

अरिहंत अरिहंत
अरिहंत अरिहंत
अरिहंत अरिहंत
अरिहंत अरिहंत

[illegible]

सिरि पंचमंगल महासुयक्खंध-सुत्त

नमो अरिहंताणं

नमो सिद्धाणं

नमो आयरियाणं

नमो उवज्झायाणं

नमो लोए सव्वसाहूणं

एसो पंचनमुक्कारो सव्वपावप्पणासणो।

मंगलाण च सव्वेसिं पढमं हवइ मंगलं॥

[illegible]

[६५–२०]

श्रीसिंहनन्दिविरचित-पञ्चनमस्कृतिदीपकान्तर्गत-नमस्कारमन्त्राः ॥

[१–३] केवलिविद्या—

(१) 'ॐ ह्रीँ अर्हँ णमो अरिहंताणं ह्रीँ नमः ॥' अथवा— 5

(२) 'ॐ णमो अरिहंताणं श्रीमद्वृषभादिवर्धमानान्तेभ्यो नमः ॥' अथवा—

(३) 'श्रीमद्वृषभादि-वर्धमानान्तेभ्यो नमः ॥'

[४–६] विविधपिशाचीविद्याः—

(१) 'ॐ णमो अरिहंताणं ॐ।' इति कर्णपिशाची।

(२) 'ॐ णमो आइ(य)रियाणं।' इति शकुनपिशाची। 10

(३) 'ॐ णमो सिद्धाणं।' इति सर्वकर्मपिशाची।

फलम्—'इति भेदोऽङ्गपठनोद्युक्तमानसो(सश्च) मुनेः।
सिद्धान्तविषयि ज्ञानं, जायते गणितादिषु ॥'

[७] अङ्गन्यासः—

'ॐ णमो अरिहंताणं' शिरोरक्षा। 'ॐ णमो सिद्धाणं' मुखरक्षा। 15

'ॐ णमो आयरियाणं' दक्षिणहस्तरक्षा। 'ॐ णमो उवज्झायाणं' वामहस्तरक्षा।

'ॐ णमो लोए सव्वसाहूणं' इति कवचम् ॥

फलम्—'एषः पञ्चनमस्कारः, सर्वपापक्षयङ्करः।
मङ्गलानां च सर्वेषां, प्रथमं मङ्गलं मतः ॥'

[८] वज्रपञ्जरम्— 20

'ॐ' हृदि। 'ह्रीँ' मुखे। 'णमो' नाभौ। 'अरि' वामे। 'हंता' वामे। 'ताहं' शिरसि। 'ॐ' दक्षिणे बाहौ। 'ह्रीँ' वामे बाहौ। 'णमो' कवचम्। 'सिद्धाणं' अस्त्राय फट् स्वाहा।

फलम्—विपरीतकार्येऽङ्गन्यासः, शोभनकार्ये वज्रपञ्जरं स्मरेत्, तेन रक्षा।

[९] अपराजिताविद्या—

'ॐ णमो अरिहंताणं, णमो सिद्धाणं, णमो आयरियाणं, णमो उवज्झायाणं, णमो लोए सव्व- 25 साहूणं ह्रीं फट् स्वाहा ॥'

फलम्—'इत्येषोऽनादिसिद्धोऽयं, मन्त्रः स्याच्चित्तचित्रकृत्।
इत्येषा पञ्चाङ्गी विद्या, ध्याता कर्मक्षयं कुरुते ॥'

[१०] परमेष्ठिबीजमन्त्रः—

'ॐ।' तत् कथमिति चेत्—

'अरिहंता असरीरा, आयरिया तह उवज्झाया मुणिणो।
पढमक्खर(र)णिप्पणो(ण्णो)ॐकारो पंचपरमेट्ठी॥'

5 'अकः सेदीः [ ] इति जैनेन्द्रसूत्रेण अ+अ इत्यस्य दीर्घः। आ+आ पुनरपि दीर्घः'। 'उ' तस्य पररूपगुणे कृते ओमिति जाते पुनरपि 'मोऽर्धचन्द्रः' [ ] इति सूत्रेणानुस्वारे सति सिद्धपञ्चाङ्गमन्त्रं निष्पद्यते।

[११] षोडशाक्षरी विद्या—

'अर्हत्-सिद्धाचार्योपाध्याय-सर्वसाधुभ्यो नमः॥"

10 माहात्म्यम्—'स्मर मन्त्रपदोद्भूतां, महाविद्यां जगन्नुताम्।
गुरुपञ्चकनामोत्थपोडशाक्षरराजिताम्॥'

फलम्—'अस्याः शतद्वयं ध्यानी, जपन्नेकाग्रमानसः।
अनिच्छन्नप्यवाप्नोति, चतुर्थतपसः फलम्॥

[१२] सप्तदशाक्षरी विद्या—

15 'ॐ ह्रीँ अर्हत्-सिद्धाचार्योपाध्याय-साधुभ्यो ह्रीँ नमः॥

फलम्—'अनया वागवादकत्वं, समाप्नोति च मानवः॥'

[१३] देवत्रयीविद्या—

'ॐ ह्रीँ अर्हत्-सिद्ध-साधुभ्यो ह्रीँ नमः॥'

[१४] षडक्षरीविद्या—

20 'ॐ ह्रीँ अर्हँ नमः।'

फलम्—'इति षडक्षरी विद्या, कथिता दीक्षितार्पणे॥"

[१५] षड्वर्णसंभूता विद्या—

'अरिहंत सिद्ध।' अथवा—'अरिहंत साहु।' अथवा—'जिनसिद्धसाहु।'

फलम्—'विद्यां षड्वर्णसंभृतामजय्यां पुण्यशालिनीम्।
25 जपन् चतुर्थमभ्येति, फलं ध्यानी शतत्रयम्॥'

[१६] चतुर्वर्णमयो मन्त्रः—

'अरिहंत।' अथवा— 'जिनसिद्ध।' अथवा— 'अर्हत्सिद्ध।'

फलम्—'चतुर्वर्णमयं(यो) मन्त्रं(मन्त्रः), चतुर्वर्गफलप्रदम् (दः)।
चतुःशतीं जपन् योगी, चतुर्थस्य फलं भजेत्॥'

30 [१७] द्विवर्णो मन्त्रः—

'सिद्ध।' अथवा— 'जिन।' अथवा— 'अर्हँ।'

[१८] एकाक्षरी मन्त्रः—'ॐ।'

फलम्—'ॐकारं बिन्दुसंयुक्तं, नित्यं ध्यायन्ति योगिनः।
कामदं मोक्षदं चैव, प्रणवाय नमो नमः॥'

[१९] अकारध्यानं, तत्फलं च—'अ।'

'आदिमन्त्रार्हतो नाम्नोऽकारं पञ्चशतप्रमान्।
वारान् जपन् त्रिशुद्धया यः स चतुर्थफलं श्रयेत्॥'

[२०] पञ्चवर्णमयी विद्या—

'ह्राँ ह्रीँ ह्रूँ ह्रौँ ह्रः।' अथवा—'अ सि आ उ सा।'

संपुटे तु—'ॐ ह्राँ ह्रीँ ह्रूँ ह्रौँ ह्रः अ सि आ उ सा नमः।' अथवा—

'ॐ असिआउसा नमः।' अथवा—'ॐ ह्राँ ह्रीँ ह्रूँ ह्रौँ ह्रः नमः।' इति भेदः।

माहात्म्यम्—'पञ्चवर्णमयीं विद्यां, पञ्चतत्त्वोपलक्षिताम्।
मुनिवी(व)रैः श्रुतस्कन्धाद्, बीजबुद्धया समुद्धृताम्॥'

फलम्—'बन्दिमोक्षे च प्रथमो, द्वितीयः शान्तये स्मृतः।
तृतीयो जनमोहार्थे, चतुर्थः कर्मनाशने॥
पञ्चमः कर्मषट्केषु, पञ्चैवं मुक्तिदाः स्मृताः।
तृतीयनियताभ्यासाद्, वशीकृतनिजाशयः॥
प्रोच्छिनत्त्याशु निःशङ्को, निगूढं जन्मबन्धनम्।'

[२१] मुक्तिदा विद्या—

'चत्तारि मंगलं। अरिहंत(ता)मंगलं। सिद्ध(द्धा)मंगल। साहु(हू) मंगलं। केवलिपण्णत्तो धम्मो मंगलं।

चत्तारि लोगो(गु)त्तमा। अरिहंत(ता) लोगो(गु)त्तमा। सिद्ध(द्धा) लोगो(गु)त्तमा। साहु लोगो(गु)त्तमा। केवलिपण्णत्तो धम्मो लोगो(गु)त्तमो।

चत्तारि श(स)रणं पवज्जामि। अरिहंत(ते) श(स)रणं पवज्जामि। सिद्ध(द्धे) श(स)रणं पवज्जामि। साहु(हू) श(स)रणं पवज्जामि। केवलिपण्णतो(त्तं) धम्मो(म्मं) श(स)रणं पवज्जामि॥ इति मुक्तिदा विद्या।

फलम्—'मङ्गल-शरणोत्तमनिकुरम्बं, यस्तु संयमी स्मरति।
अविकलमेकाग्रधिया, स चापवर्गश्रियं श्रयति॥'

[२२] विश्वातिशायिनी विद्या—

'ॐ अर्हत्सिद्धसयोगिकेवली स्वाहा।'

माहात्म्यम्—'सिद्धेः सौधं समारोढुमियं सोपानमालिका।
त्रयोदशाक्षरोत्पन्ना, विद्या विश्वातिशायिनी॥'

[२३] ऋषिमण्डलमन्त्रराजमंत्रः—

'ॐ ह्रां ह्रीं ह्रुं ह्रूं ह्रें ह्रैं ह्रौं ह्रः अ सि आ उ सा सम्यग्दर्शनज्ञान-चारित्रेभ्यो नमः।'

फलम्—'यो भव्यमनुजो मन्त्रमिमं सप्तविंशतिवर्णयुतं ऋषिमण्डलमन्त्रराजं ध्यायति जपति सहस्राष्टकं (८०००) स वाञ्छितार्थमिहपरलोकसुखं सर्वाभीष्टं प्राप्नोति।'

5 [२४] मूलत्रयी विद्या—

'ॐ ह्रीं श्रीं अर्हं नमः। अथवा नमो सिद्धाणं।' अथवा-'ॐ नमः सिद्धं।' इति मूलत्रयीविद्या वश्यमोहनपुष्टिदा ॥

[२५] (ॐ) 'नमो अरिहंताणं' इति मन्त्रस्य ध्यानप्रक्रिया—

'स्मरेन्दुमण्डलाकारं, पुण्डरीकं मुखोदरे।
10 दलाष्टकसमासीनं, वर्णाष्टकनिराजितम् ॥
'ॐ नमो अरिहंताणं' इति वर्णानपि क्रमात्।
एकशः प्रतिपत्रं तु, तस्मिन्नेव निवेशयेत् ॥'

अकारादि—'स्वर्णगौरीं स्वरोद्भूतां, केशरालीं ततः स्मरेत्।
कर्णिकां च सुधाबीजं, व्रजन्तु भुवि भूषिताम् ॥'

15 [२६] 'ह्रीं' इति मन्त्रस्य ध्यानप्रक्रिया—

'प्रोद्यत्संपूर्णचन्द्राभं, चन्द्रबिम्बाच्छनैः शनैः।
समागच्छत्सुधाबीजं, मायावर्णं तु चिन्तयेत् ॥
विस्फुरन्तमति स्फीतं, प्रभामण्डलमध्यगम्।
संचरन्तं मुखाम्भोजे, तिष्ठन्तं कर्णिकोपरि ॥
20 भ्रमन्तं प्रतिपत्रेषु, चरन्तं वियति क्षणे।
छेदयन्तं मनोध्वान्तं, स्रवन्तममृताम्बुभिः ॥
व्रजन्तं तालुरन्ध्रेण, स्फुरन्तं भ्रूलतान्तरे।
ज्योतिर्मयमिवाचिन्त्यप्रभावं चिन्तयेन्मुनिः ॥'

उपर्युक्तमन्त्रद्वयस्य फलम्—

25 'ॐ नमो अरिहंताणं' इमेऽष्टौ वर्णाः, 'ह्रीं' इमं महामन्त्रं स्मरन् योगी विषनाशं प्राप्नोति। जपन् सन् सर्वशास्त्रपारगो भवति। निरन्तराभ्यासात् षड्भिर्मासैर्मुखमध्याद् धूमवर्तिं पश्यति। ततः संवत्सरेण मुखान्महाज्वालां निःसरन्तीं पश्यति। ततः सर्वज्ञमुखं पश्यति। ततः सर्वज्ञं प्रत्यक्षं पश्यति ॥'

[२७] सप्तबीजमन्त्रध्यानम्—

30 'ॐ ॐ ॐ ॐ ॐ ॐ ॐ' इति सप्तबीजमन्त्रं ध्यायन् सप्तर्द्धीः प्राप्नुते। यथा पुरा तथापि नो जाप्यमिदमधुना मूलमेकं वेदमध्यं (?) वेष्टनत्रिकसंयुतं तस्य नीचैर्माया त्रिः चेकारबिन्दुसंयुता

नवाक्षरमिदं बीजमनाहतं समाख्यातम्। एतस्य ध्यानेन सिद्धचक्रं मुक्तिस्थितमपि परं ब्रह्म त(य)दगम्यम-वाच्यमचिन्त्यं तदपि ध्येयविषयं भवति। तदुक्तं जाप्यं यथारुचितो नानाविधमपि तदेव, सदृशत्वात्।

तदुक्तं नेमिचन्द्रसिद्धान्तिकैर्द्रव्यसंग्रहे—

[अत ऊर्ध्वं पदस्थं ध्यानं मन्त्रवाक्यस्थं यदुक्तं तस्य विवरणं कथयति—]

'पणतीस सोल छप्पण चदु दुगमेकं च जवह झाएह ।
परमेट्ठिवाचयाणं अण्णं च गुरूवएसेणं ॥ ४९ ॥ 5

[व्याख्या—'पणतीस' "णमो अरिहंताणं, णमो सिद्धाणं, णमो आयरियाणं, णमो उवज्झायाणं, णमो लोए सव्वसाहूणं" एतानि पञ्चत्रिंशदक्षराणि सर्वपा(प)दानि भण्यन्ते। 'सोलह' "अरिहंत सिद्ध आचार्य(यरिय) उवज्झाय साहू" एतानि षोडशाक्षराणि नामपदानि भण्यन्ते। 'छ' "अरिहंतसिद्ध" एतानि षडक्षराणि अर्हत्-सिद्धयोर्नामपदे द्वे भण्येते। 'पण' "असिआउसा" एतानि पञ्चाक्षराणि 10 आदिपदानि भण्यन्ते। 'चदु' "अरिहंत" इदमक्षरचतुष्टयं नामपदम्। 'दुगं' "सिद्ध" इत्यक्षरद्वयं सिद्धस्य नामपदम्। 'एगं च' "अ" इत्येकाक्षरमर्हत आदिपदम्। अथवा "ॐ" एकाक्षरं पञ्चपरमेष्ठिनामादिपदम्। तत कथमिति चेत् ?—

'अरिहंता असरीरा, आयरिया तह उवज्झाया मुणिणो।
पढमक्खरनिप्पण्णो, ॐकारो पंचपरमेट्ठी ॥ 15

इति गाथाकथितप्रथमाक्षराणां 'समानः सवर्णे दीर्घी भवति' 'परश्चलोपम्' 'ऊवर्णे ऊ' इति स्वरसन्धिविधानेन ॐशब्दो निष्पद्यते। कस्मादिति—'जवह झाएह' एतेषां पदानां सर्वमन्त्रवादपदेषु मध्ये सारभूतानां इहलोकपरलोकेष्टफलप्रदानसमर्थं ज्ञात्वा पश्चादनन्तज्ञानादिगुणस्मरणरूपेण वचनो-च्चारणेन च जापं कुरुत। तथैव शुभोपयोगरूपत्रिगुप्तावस्थायां मौनेन ध्यायत। पुनरपि कथंभूता [ना]म् 'परमेट्ठिवाचयाणं'। 'अरिहंत' इति पदवाचकमनन्तज्ञानादिगुणयुक्तोऽर्हद्वाच्योऽभिधेय इत्यादिरूपेण 20 पञ्चपरमेट्ठि(ष्ठि)वाचकानाम्। 'अण्णं च गुरुवएसेण' अन्यदपि द्वादशसहस्रप्रमितपञ्चनमस्कारग्रन्थ-कथितक्रमेण लघुसिद्धचक्रं, बृहत्सिद्धचक्रमित्यादिदेवार्चनविधानं भेदाभेदरत्नत्रयाराधकगुरुप्रसादेन ज्ञात्वा ध्यातव्यम्। इति पदस्थध्यानस्वरूपं व्याख्यातम् ॥ ४९ ॥—इत्येतद् द्रव्यसंग्रहस्य ब्रह्मदेवविरचि-तव्याख्यात उद्धृतम्]

[२८] अथाङ्गन्यासः— 25

तत्सिद्ध्यर्थम्—अ सि आ उ सा। 'अ' वर्णं नाभिकमले, सि मस्तककमले, आ कण्ठकञ्जे, उ हृदये, सा मुखकमले। वा—अ नाभौ, सि शिरसि, आ कण्ठे, उ हृदये, सा मुखे।

[२९] ॐ कारादीनां ध्यानप्रक्रिया—

अत्र ॐ नमः सिद्धेभ्यः। ॐ कारः, ह्रींकारः, अकारः, अर्हं इत्यादिकमुक्तं तत् क्व स्मरणीयम् ? तदेव [कथमपि]— 30

'नेत्रद्वन्द्वे श्रवणयुगले नासिकाग्रे ललाटे,
वक्त्रे नाभौ शिरसि हृदये तालुनि भ्रूयुगान्ते।
ध्यानस्थानान्यमलमतिभिः कीर्तितान्यत्र देहे,
तेष्वेकस्मिन् नियतविषये चित्तमालम्बनीयम्॥

5 [इति प्रथमेन प्रकारेण ध्यानविषयं गतम्॥]

[३०] ज्वरोत्तारणमन्त्रः—

' ॐ ह्रीँ नमो लोए सव्वसाहूणं' इत्यादि प्रतिलोमतः।
पञ्चभिस्तेज आद्यैश्च मायाग्रेसरपूर्वकैः॥
पटीग्रन्थि परिजप्य, दत्त्वाच्छाद्य नरोपरि।
10 तेन ज्वरं चोत्तरति, नूतनवस्त्रे परं मतम्॥

[३१] पञ्चचत्वारिंशदक्षरा विद्या—

'ॐ ह्रीँ नमो अरिहंताणं, ॐ ह्रीँ नमो सिद्धाणं, ॐ ह्रीँ नमो आयरियाणं, ॐ ह्रीँ नमो उवज्झायाणं, ॐ ह्रीँ नमो लोए सव्वसाहूणं।'

एषा पञ्चचत्वारिंशदक्षरा विद्या। यथा न श्रूयते तथा स्मर्तव्या। दुष्टचौरादिसङ्कटमहापत्ति-15 स्थाने शान्त्यै, जलवृष्टये चोपांशु भण्यते। पञ्चनामादिपदानां पञ्चपरमेष्ठिमुद्रया जापे समस्तक्षुद्रोपद्रवनाशः कर्मक्षयश्च भवति।

[३२] देवगणी विद्या—(गणिविद्या)—

'ॐ अरिहंत-सिद्ध-आयरिय-उवज्झाय-सव्वसाहु-सव्वधम्मतित्थयराणं ॐ नमो भगवईए सुयदेवयाए संतिदेवयाणं सव्वपवयणदेवयाणं दसण्हं दिशा(सा)पालाणं पञ्च(ण्हं)लोगपालाणं ॐ 20 ह्रीँ अरिहंतदेवं नमः।'

एषा विद्या देवगणीति सरस्वतीमन्दिरे जाप्यमष्टोत्तरशतम्। जप्ता सती सर्वेषु कार्येषु सर्वसिद्धिं जयं च ददाति।

[३३] तस्करभयहरमन्त्रः—

'ॐ ह्रीँ णमो सिद्धाणं, ॐ ह्रीँ सिद्धदेवं नमः।'

25 अनेन सप्ताभिमन्त्रिते वस्त्रे ग्रन्थिर्बन्धनीया। पश्चाद् यत्र कुत्रापि महारण्ये तस्करभयं न भवति।

[३४] व्यालादिविषनाशनमन्त्रः—

'ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः णमो सिद्धाणं विषं निर्विषीभवतु फट्।'
इत्यनेन व्यालादिविषं नश्यति।

30 [३५] व्याल-वृश्चिक-मूषकादिदूरीकरणमन्त्रः—

'ॐ णं सिद्धा णमो दूरीभवन्तु नागाः।'
इत्यनेन व्याल-वृश्चिक-मूषकादयो दूरतो यान्ति।

[३६] बन्दिविमोचनमन्त्रः—

'णं हु सा व्व स ए लो मो ण, णं या ज्झा व उ मो ण, णं या रि य आ मो ण, णं द्धा सि मो ण, णं ता हं रि अ मो ण।'

इति विपर्ययजपनाद् बन्दिमोक्षः। कार्यव्यतिरेकेण न जपनीयम्। कार्यव्यतिरेके कारणविशेषो बलवान् इति न्यायात्। कार्ये बन्दिमोक्षादिसाध्यं। कारणं प्रति कार्यस्य शान्तिकर्मादेर्मोचनादेर्व्यति- 5 रेकोऽपि यथा स्यात् मोचकबन्धवद् वा द्वितीयो बन्धमोचकवत्॥

[३७] सर्वकर्मसमूहदायकमन्त्रः—

'ॐ नमो अरिहंताणं, ॐ नमो सिद्धाणं, ॐ नमो आयरियाणं, ॐ नमो उवज्झायाणं, ॐ नमो लोए सव्वसाहूणं ॐ ह्रूाँ ह्रीं ह्रूँ ह्रौं ह्रः स्वाहा।' सर्वकर्मसमूहं कलौ पञ्चम-युगेऽपि ददाति। 10

[३८] चतुःषष्टिऋद्धिजननमन्त्रः—

'ॐ णमो आयरियाणं ह्रीँ स्वाहा।' इत्यनेन चतुःषष्ट्य ऋद्धयः संभवन्ति।

[३९] कर्मक्षयार्थो मन्त्रः

'ॐ णमो हँ (ह्रूँ) नमः।' इत्यनेन कर्मक्षयो भवति।

[४०] एकादशीविद्या— 15

'ॐ अरिहंतसिद्धसाहू नमः।' इत्येकादशी विद्या।

[४१-४२] त्रयोदशाक्षरीविद्ये—

(१) 'ॐ अर्हँ अरिहंतसिद्धसाहू नमः।' इति त्रयोदशाक्षरी विद्या।

(२) ॐ ह्राँ ह्रीँ ह्रूँ ह्रौँ ह्रः अ सि आ उ सा स्वाहा।' इत्यपि।

[४३] सर्वकामदौ मन्त्रौ— 20

(१) 'ॐ ह्राँ ह्रीँ ह्रूँ ह्रौँ ह्रः अ सि आ उ सा नमः।'

(२) 'ॐ ह्रीँ श्रीँ अर्हँ अ सि आ उ सा नमः।' द्वावपि मन्त्रौ सर्वकामदौ।

[४४] बन्दिमोचनमन्त्रः—

'ॐ नमो अरिहंताणं ज्म्ल्व्यूँ नमः, ॐ नमो सिद्धाणं क्ष्म्ल्व्यूँ नमः, ॐ नमो आयरियाणं स्म्ल्व्यूँ नमः, ॐ नमो उवज्झायाणं ह्म्ल्व्यूँ नमः, ॐ नमो लोए सव्वसाहूणं घ्म्ल्व्यूँ नमः अमुकस्य 25 बन्दिमोक्षं कुरु कुरु स्वाहा।'

पार्श्वनाथस्य प्रतिमां, संस्थाप्य पुरतस्ततः।
पट्टं प्रसार्य संलेख्यं, मन्त्रं पञ्चशतप्रमम्॥
नामसंपुटसंयुक्तं, बन्दिमोक्षह(क)रं परम्॥'

[४५] स्वप्नविद्या—

'ॐ ह्रीँ णमो अरिहंताणं स्वप्ने शुभाशुभं वद कू(कु)ष्माण्डिनी स्वाहा।' (स्वप्नविद्या।)

'मन्त्रोऽयं शतसंजप्तो, वक्ति स्वप्ने शुभाशुभम्।
चार्कवारे श्वेतपुष्पैर्वर्णपुष्पफलाङ्कितैः॥'

5 [४६] धर्मद्रुह उच्चाटनमन्त्रः—

"ॐ ह्रीँ अ सि आ उ सा सर्वदुष्टान् स्तम्भय स्तम्भय मोहय मोहय मु(मू)कवत् कारय कारय अन्धय अन्धय ह्रीँ दुष्टान् ठः ठः।'

इदं मन्त्रं मुष्टिबद्धो, वैरिणं प्रति संजपन्।
धर्मद्रुहो नाशनं च, करोत्युच्चाटनं तथा॥

10 [४७] भूतप्रेतादिनाशनमन्त्रः—

ॐ ह्रीँ अ सि आ उ सा प्रेतादिकान् नाशय नाशय ठः ठः।'
इदं मन्त्रं ह्येकविंशवारजप्तं करोति च।
भूत-प्रेतादिकवधं, संशयो न हि सांप्रतम्॥

[४८] जाले मत्स्यानां निर्बन्धनमन्त्रः—

15 'ॐ नमो अरिहंताणं' इत्यादिकृत्य 'ॐ नमो लोए सव्वसाहूणं हुलु हुलु चुलु चुलु मुलु मुलु स्वाहा।'

२१ जाप्यतो दत्तं जाले मत्स्याः नायान्ति॥

[४९] त्रिभुवनस्वामिनीविद्या—

'ॐ ह्रीँ श्रीँ क्लीँ ह्रीँ अ सि आ उ सा चुलु चुलु हुलु हुलु चुलु चुलु इच्छियं मे कुरु कुरु 20 स्वाहा।'

त्रिभुवनस्वामिनीविद्येयं चतुर्विंशतिसहस्रजापात् सर्वसंपत् [करी] स्यात्।

[५०] वादजयार्थो मन्त्रः—

'ॐ ह्रीँ अ सि आ उ सा नमोऽर्हँ वद वद वाग्वादिनी सत्यवादिनी वद वद मम वक्त्रे व्यक्तवाचा ह्रीँ सत्यं ब्रूहि सत्यं ब्रूहि सत्यं वदास्खलितप्रचारं सदेव-मनुजासुरसदसि ह्रीँ अर्हँ अ सि आ उ सा नमः।

25 लक्षं जप्तमिदं मन्त्रं वादे संतनुते जयम्।

[५१] सर्वसिद्धिप्रदमहामन्त्रः—

'ॐ अ सि आ उ सा नमः।'
इदं मन्त्रं महामन्त्रं, सर्वसिद्धिप्रदं ध्रुवम्॥

[५२] त्रिभुवनस्वामिनी विद्या—

30 'ॐ अर्हते उत्पत उत्पत स्वाहा।' इति द्वितीया त्रिभुवनस्वामिनी विद्या।

[५३] वादजयकरीविद्या—

'ॐ अग्गिय मग्गिय अरिहं जिण आइय पंचमायधरा ।
दुट्ठट्ठकम्मदड्ढा (द्ध) सिद्धाण णमो अरिहणाणेभ्यः ॥'

इति वादे जयं करोति ।

[५४] संघरक्षार्थको मन्त्रः— 5

"ॐ नमो अरिहंताणं धणु धणु महाधणु महाधणु स्वाहा ।'
इदं मन्त्रं ललाटे च, ध्येयं सत् चोरनाशनम् ।
करोति चैतदुक्तं वा, कम्पनैर्मुनिनायकैः ।
संघस्य रक्षार्थमिदं, ध्येयं नान्यत्र हेतुके ॥

[५५] स्वप्ने शुभाशुभकथनमन्त्रः— 10

'ॐ ह्रीँ अर्हँ क्ष्वीँ स्वाहा ।'

चन्दनेन च तिलकं कृत्वा जापमष्टोत्तरशतं कृत्वा सुप्येत रात्रौ शुभाशुभं वक्ति ।

[५६] निर्विषीकरणमन्त्रः—

'ॐ ह्रीँ अर्हँ अ सि आ उ सा क्ष्लीँ नमः ।' इत्यनेन निर्विषीकरणत्वम् ।

[५७] पञ्चाक्षरीविद्या— 15

'ॐ नमो जूं सः ।'
इति पञ्चाक्षरीविद्या-मन्त्रयन्त्रे करोति च ।
भव्यस्य शुभकल्याणं, त्वेवमेव मतं बुधैः ॥
कर्णिकायां त्वेक[त]त्त्वं, तत्त्वतुर्यं चतुर्दिशि ।
साष्टपत्रेषु सिद्धस्य, बीजं ज्ञेयं मुनीश्वरैः ॥ 20
तेजो-मायायुत तत्त्वं, कामबीजेन संयुतम् ।
हुतिप्रियामूलमन्त्रं, त्वेकमेव वशादिषु ॥
वाऽन्यत्प्रकारमुक्तं च, कर्णिकायां च देवके- ।
ति पदं साष्टपत्रेषु, णमोऽरिहंताणमेव च ॥
भूपुरं वारिसुपुरं, यन्त्रकर्मारिनाशनम् । 25
कर्मचक्रमिदं ज्ञेयं, ध्यानचक्रं परं गतम् ॥

कर्मचक्रम्	ध्यानचक्रम्
ॐ नमः	ॐ नमः
ॐ जूँ सः	ॐ जूँ सः
ॐ अर्हँ	धारकस्य
	शुभं भवतु

30

[५८] तस्करादर्शनमन्त्रः—

'ॐ णमो अरिहंताणं आभिणि मोहिणि मोहय मोहय स्वाहा।'

मार्गे गच्छद्भिरियं विद्या स्मरणीया, तस्करदर्शनमपि न भवति।

[५९] वशीकरणमन्त्रः दुष्टव्यन्तरादिशान्तिश्च—

